with Compliments
From MR. Vijay Kumar
Kaul.

ह्रीं

ईश्वर-आश्रम के द्वारा आयोजित विभिन्न (यज्ञ) उत्सवों पर निर्धारित स्तोत्रपाठानुक्रमाणिका

ईश्वर-आश्र

विभिन्न (यज्ञ)

स्तोत्रप

विपय सूची

		पृष्ठ संख्या
१)	कलशपूजा आरम्भ होते ही	
	क) श्रीगणेशस्तवराज, और	४-२४
	ख) बहुरूपगर्भ	२५-३३
	का पाठ करें।	
२)	अग्निकुण्ड पूजा करके गायत्री ब्राह्मण और व्याहृति आदि के पश्चात् नवग्रह स्तोत्रों का यवतिलतण्डुल होम । साधकवर्ग साम्बपञ्चाशिका स्तुतिपाठ साथ साथ करें ।	३४-४६
३)	विष्णुपञ्चक में पुरुषसूक्त आरम्भ होते ही	४७,
	मुकुन्दमाला पढ़ें ।	४८-५५
४)	रुद्रमन्त्र तथा चमकानुवाक्यं समाप्त	५६-८८
	होते ही आचार्य उत्पलस्तोत्रावलीका	८९-९३
	संग्रहस्तोत्र या जयस्तोत्र पढ़ें ।	९४-९६
	(शताध्याय आदि सूक्तों का भी होम करें।)	
५)	रुद्रमन्त्र तर्पण तथा विस्तीर्ण तर्पण।	९७-१०१
६)	अस्यवामीयसूक्त आरम्भ होते ही पञ्चस्तवी	
	में से केवल अम्बास्तव - ४ पढ़ें।	१०२-१०९
	फिर देवीपंचक का भी यथावर्णित होम करें ।	
७)	पूर्णाहुतिः पर "तव च काचन०"	१०९
	"अजानन्तो यान्ति०" तथा "पिता माता	११०
	भ्राता०" ये तीन श्लोक "आश्रावितं	११०-१११
	अत्याश्रावितं०" पूर्णाहुतिः मन्त्र से पूर्व एक स्वर में पढ़ें ।	

8) श्राद्ध करते समय
"पार्थिव प्रतिबोधिता०" से आरम्भ करके ११२-११३
श्रीमद्भगवद्गीता के
११४-११७
८ अध्याय,
११८-१२२
९ अध्याय,
१२३-१२७
१०अध्याय
१२८-१३०
१५ अध्याय
के सस्वर पाठ करें।

9) यज्ञ की पूर्णाहुति के पश्चात् "गुरुर्ब्रह्मा
गुरुर्विष्णुः०" से "ईश्वरस्वरूपस्य पादद्वयम्"
तथा श्रीरामेश्वर आचार्य विरचित गुरु-पादुका
मे से "श्रीगुरुपदनखजन्मा० से कृपाकृतार्थी-
कृतमादृशाभ्याम्" तक का पाठ करें। १३१-१३३

10) "व्योमचराचर०" के पढने के पश्चात्
"गुरुकृष्ण समुद्गेन्द्रभैरवं०" की १३४-१३६
आरती करें।

11) कलशविसर्जन के समय "बहुरूपगर्भ०" २५-३३
का पाठ अवश्य करें।
१३७-१३९

12) भोजनविधि:

****

अथ श्रीगणेशस्तवराजः ।।

***

ॐ विघ्नेशो नः स पायाद्विहृतिषु जलधिं
पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं
दृश्यते व्योम्नि देवैः ।
क्वाप्यस्थः क्वापि विष्णुः क्वचन कमलभूः
क्वाप्यऽनन्तः क्वच श्रीः
क्वाप्यौर्वः क्वापि शैलाः क्वचन मणिगणाः
क्वापि नक्रादिसत्वाः ।।
निर्विघ्नविश्वनिर्माणसिद्धये यदनुग्रहम् ।
मन्ये स वव्रे धातापि तस्मै विघ्नजिते नमः ।।
सर्गारम्भेऽप्यजाताय बीजरूपेण तिष्ठते ।
धात्रा कृतप्रणामाय गणाधिपतये नमः ।।
गणेशाय नमः प्रह्ववाञ्छिताम्बुजभानवे ।
सितदंष्ट्रांकुरस्फीतविघ्नौघतिमिरेन्दवे ।।
प्रणमास्यजमीशानं योगशास्त्रविशारदम् ।
निःशेषगणवृन्दस्य नायकं सुविनाशयकम् ।।

श्रीब्रह्मोवाच ॥

भगवञ्छ्रोतुमिच्छामि विस्तरेण यथायथम् ।
स्तवराजस्य माहात्म्यं स्वरूपं च विशेषतः ॥

श्रीनन्दिकेश्वर उवाच ॥

स्तवराजस्य माहात्म्यं प्रवक्ष्यामि समासतः ।
शृणुष्वावहितो भूत्वा सर्वसिद्धिकरं परम् ॥
कर्मणा मनसा वाचा ये प्रपन्ना विनायकम् ।
ते तरन्ति महाघोरं संसारं कामवर्जिताः ॥

सकृज्जप्त्वा स्तवराजमुत्तमं
तत्त्वशेषं भवपाशपञ्जरम् ।
विमुच्यते संसृतिसागरान्नरो
विभूतिमाप्नोति सुरैः सुदुर्लभाम् ॥

यत्फलं लभते जप्त्वा स्वरूपं चापि यादृशम् ।
यः प्रातरुत्थितो विद्वान्ब्राह्मे वापि मुहूर्तके ॥
त्रिषुवासनकालेषु पूर्वे वा समयान्तरे ।
सकृद्वा जपञ्जन्तुः स्तवराजं स्तवोत्तमम् ॥
यत्फलं लभते मर्त्यः तच्छृणुष्व चतुर्मुख ।
गङ्गाप्रवाहवत्तस्य वाग्विभूतिर्विजृम्भते ॥

बृहस्पतिसमो बुद्ध्या पुरन्दरसमः श्रिया ।
तेजसादित्यसङ्काशो भार्गवेण समो नये ।।
धनदेन समो दाने तथा वित्तपरिग्रहे ।
धर्मराजसमो न्याये शिवभक्तो मया समः ।।
प्रतापे वह्निसंकाशः प्रसादे शशिना समः ।
बलेन मरुता तुल्यो भवता ब्रह्मवर्चसे ।।
सर्वतत्त्वार्थविज्ञाने मयापि समतां व्रजेत् ।
एवमेतत्त्रिसंध्यं वै जपन्स्तवमनुत्तमम् ।।
सर्वान्कामान्नरः प्राप्य भुक्त्वा भोगान्यथेप्सितान् ।
सशरीरः सुरेन्द्रस्य पदं न्यस्यति मूर्धनि ।।
प्राप्याष्टगुणमैश्वर्यं भुक्त्वा भोगान्सुपुष्कलान् ।
अक्षयो वीतशोकश्च निरातङ्को निरामयः ।।
जरामरणनिर्मुक्तो वेदशास्त्रार्थकोविदः ।
सिद्धचारणगन्धर्वदेवविद्याधरादिभिः ।।
संस्तूयमानोमुनिभिः शंस्यमानो दिनेदिने ।
विचरत्यऽखिलांल्लोकान्बन्धुवर्गैः समं नरः
एवं चिराय निर्वाह्य देवस्यानुचरोभवेत् ।
स्तवराजं सकृज्जप्त्वा मुच्यते सर्वकिल्बिषैः ।।

सर्वसिद्धिमवाप्नोति पुनात्यासप्तमं कुलम् ।
नाशयेद्विघ्नसंघातांस्तेन वैनायकं स्मृतम् ॥
स्तवराजमनुस्मरञ्जपन्हृदयाग्रे विलिखन्पठन्नपि ।
स सुरासुरसिद्धचारणैर्मुनिभिः प्रत्यहमेव पूज्यते ॥
तरति च भवचक्रं सर्वमोहं निहन्ति
क्षिपति च परवादं मान्यते बन्धुवर्गैः ।
अखिलमपि च लोकं क्षेमतामाशु नीत्वा
व्रजति यतिभिरीड्यं शाश्वतं धाम मर्त्यः ॥
यो जपति स्तवराजमशोकः
क्षेमतमं पदमेति मनुष्यः ।
चारणसिद्धसुरैरभिवन्द्यो
याति पदं परमं स विमुक्तः ॥
जपेद्यः स्तवराजाख्यमिमं प्रातः स्तवोत्तमम् ।
तस्यापचारं क्षमते सर्वदैव विनायकः ॥
सर्वान्निहन्ति वै विघ्नान्विपदश्च समन्ततः ।
क्रोधाग्निर्योगनाथस्य सम्यग्भिरभिवर्धते ॥
अस्य च प्रणता लक्ष्मीः कटाक्षानुविधायिनी ।
किं करोमीति वै भीत्या पुरस्तादेव तिष्ठति ॥

तस्मान्निःश्रेयसं गन्तुमतिभक्त्या विचक्षणः ।
स्तवराजं जपेज्जन्तुर्धर्मकामार्थसिद्धये ।।
आधिव्याध्यस्त्रशस्त्राग्नितमःपङ्कार्णवादिषु ।
भयेष्वन्येषु चाप्येतत्स्मरन्मुक्तो भवेन्नरः ।।
स्तवराजं सकृज्जप्त्वा मार्गं गच्छति मानवः ।
न जातु जायते तस्य चौरव्याघ्रादिभिर्भयम् ।।
यथा वरिष्ठो देवानामशेषाणां विनायकः ।
तथा स्तवो वरिष्ठोयं स्तवानां शम्भुभावितः ।।
अवतीर्णो यदा देवो विघ्नराजो विनायकः ।
तदा लोकोपकारार्थं प्रोक्तोऽयं शम्भुना स्वयम् ।।
विनायकप्रियकरो देवस्य हृदयङ्गमः ।
जप्यः स्तवोऽयं यत्नेन धर्मकामार्थसिद्धये ।।
"अस्य श्रीमहागणपतिस्तवराजमंत्रस्य
श्रीईश्वर ऋषिः नानावृत्तानि छन्दांसि
विनायको देवता तत्पुरुष इति बीजं
एकदन्त इति शक्तिः वक्रतुण्ड इति कीलकं
आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं
सर्वविघ्ननिवारणार्थं धर्मकामार्थसिद्ध्यर्थे
श्रीमहागणपतिस्तवराज पाठे विनियोगः ।।

अथ ध्यानम् ॥

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलेर्बन्धने
स्रष्टुं वारिरुहोद्भवेन विधिना शेषेण धर्तुं धराम् ।
पार्वत्या महिषासुरप्रमथने सिद्धाधिपैर्मुक्तये
ध्यातः पञ्चशरेण लोकविजये पायात्स नागाननः ॥

श्रीईश्वर उवाच ॥

ओंकारममृतं ब्रह्म शिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये विनायकम् ॥
यतः प्रकृतिर्जगतां यः साक्षी हृदयस्थितः ।
आधारभूतो विश्वस्य तं प्रपद्ये विनायकम् ॥
यस्य प्रसादाच्छक्राद्याः प्राणन्ति निमिषन्ति च ।
प्रवर्तकं तं लोकानां प्रणमामि विनायकम् ॥
शिखाग्रे द्वादशाङ्गुल्ये स्थितं सूक्ष्मतनुं विभुम् ।
युञ्जन्ति यं सदाभ्यासात्तं नमामि गणाधिपम् ॥
लीलया लोकरक्षार्थं द्विधाभूतो महेश्वरः ।
यः स्वयं जगतः साक्षी तं वन्दे द्विरदाननम् ॥
विश्वेश्वरं विधातारं धातारं जगतामपि ।
प्रणमामि गणाध्यक्षं प्रणतार्तिविनाशनम् ॥

उत्सङ्गतल्पे यो देव्या भवान्याः क्रीडते विभुः ।
बालो हरन्मनस्तस्यास्तं प्रपद्ये विनायकम् ।।
विधाय भूषणैश्चित्रैर्वेषकर्म मनोरमम् ।
यं दृष्ट्वा पश्यतीशानी तं प्रपद्ये विनायकम् ।।
लीलया यः सृजंल्लोकान्भिन्दन्नपि मुहुर्मुहुः ।
संक्रीडते महासत्त्वस्तं नतोऽस्मि गणाधिपम् ।।
सिन्दूरितमहाकुम्भस्तुङ्गदन्तः सुभैरवः ।
भिनत्ति दैत्यकरिणस्तं वन्दे द्विरदाननम् ।।
यस्य मूर्तिं व्रजन्त्याशु मदामोदानुषङ्गिणः ।
भ्रमरास्तीव्रसंरावास्तं नमामि विनायकम् ।।
गम्भीरभीमनिनदं श्रुत्वा यद्बृंहितं क्षणात् ।
पतन्त्यसुरनागेन्द्रास्तं वन्दे द्विरदाननम् ।।
यो भिनत्ति गिरीन्सर्वान्घोरनिर्घातभैरवैः ।
रवैः सन्त्रासजननैस्तं वन्दे द्विरदाननम् ।।
लीलया प्रहता येन पादाभ्यां धरणी क्षणात् ।
संशीर्यते सशैलौघा तं वन्दे चण्डविक्रमम् ।।
यत्करातातडनैर्भिन्नस्तम्भः शतसहस्रधा ।
विशीर्यते समुद्राणां तं नतोऽस्मि गणाधिपम् ।।

विमुखा यत्र दृश्यन्ते भ्रष्टवीर्याः पदच्युताः ।
निष्प्रभा विबुधाः सर्वस्तं प्रपद्ये विनायकम् ॥
यद्भ्रूप्रणिहितां लक्ष्मीं लभन्ते वासवादयः ।
स्वतन्त्रमेकं नेतारं विघ्नराजं नमाम्यहम् ॥
यत्पादपांसुनिचयं विभ्राणा मणिमौलिषु ।
अमरा बहु मन्यन्ते तं नतोस्मि गणाधिपम् ॥
वेदान्तगीतं पुरुषं वरेण्यमभयप्रदम् ।
हिरण्मयपुरान्तःस्थं तमस्मि शरणं गतः ॥
चित्सुखानन्दसन्दोहं परानन्दस्वरूपिणम् ।
निष्कलं निर्मलं साक्षाद्विनायकमुपैमि तम् ॥
अनपायं च सकृतं भूतिदं भूतिवर्धनम् ।
नमामि सत्यविज्ञानमनन्तं ब्रह्मरूपिणम् ॥
अनाद्यन्तं महादेवप्रियपुत्रं मनोरमम् ।
द्विपाननं विभुं साक्षादात्मानं तं नमाम्यहम् ॥
विश्वासुरेश्वरैर्वन्द्यमाधारं जगतामपि ।
प्रणमामि गणाध्यक्षं प्रणताज्ञानमोचनम् ॥
शिखाग्रे द्वादशाङ्गुल्ये स्थितं स्फटिकसन्निभम् ।
गोक्षीरधवलाकारं प्रणमामि गजाननम् ॥

अनाधारं नवाधारमनन्ताधारसंस्थितम् ।
धातारं च विधातारं तमस्मि शरणं गतः ।।
अनन्तदृष्टिं लोकादिमनन्तं विद्रुमप्रभम् ।
अप्रतर्क्यमनिर्देश्यं निरालम्बं नमाम्यहम् ।।
भूतालयं जगद्योनिमणीयांसमणोरपि ।
स्वसंवेद्यमसंवेद्यं वेद्यावेद्यं नमाम्यहम् ।।
प्रमाणप्रत्ययातीतं हंसमव्यक्तलक्षणम् ।
अनाविलमनाकारं तमस्मि शरणं गतः ।।
विश्वाकारमनाकारं विश्वावासमनामयम् ।
सकलं निष्कलं नित्यं नित्यानित्यं नमाम्यहम् ।।
संसारवैद्यं सर्वज्ञं सर्वभेषजभेषजम् ।
आत्मानं सदसद्व्यक्तं धातारं प्रणमाम्यहम् ।।
भ्रूमध्ये संस्थितं देवं नाभिमध्ये प्रतिष्ठितम् ।।
हृन्मध्ये दीपवत्संस्थं वन्दे सर्वस्य मध्यगम् ।।
हृत्पुण्डरीकनिलयं सूर्यमण्डलनिष्ठितम् ।
तारकान्तरसंस्थानं तारकं तं नमाम्यहम् ।।
तेजस्विनं विकर्तारं सर्वकारणकारणम् ।
भक्तिगम्यमहं वन्दे प्रणवप्रतिपादितम् ।।

अन्तर्योगरतैर्युक्तैः कल्पितैः स्वस्तिकासनैः ।
बद्धं हृत्कर्णिकामध्ये ध्यानगम्यं नमाम्यहम् ॥
ध्येयं दुर्ज्ञेयमद्वैतं त्रयीसारं त्रिलोचनम् ।
आत्मानं त्रिपुरारातेः प्रियसूनुं नमाम्यहम् ॥
स्कन्दप्रियं स्कन्दगुरुं स्कन्दस्याग्रजमेव च ।
स्कन्देन सहितं शश्वन्नमामि स्कन्दवत्सलम् ॥
नमस्ते विघ्नराजाय भक्तविघ्नविनाशिने ।
विघ्नाध्यक्षाय विघ्नानां निहन्त्रे विश्वचक्षुषे ॥
विघ्नदात्रेऽप्यभक्तानां भक्तानां विघ्नहारिणे ।
विघ्नेश्वराय वीराय विघ्नेशाय नमोनमः ॥
कुलाद्रिमेरुकैलासशिखराणां प्रभेदिने ।
दन्ताभिन्नाभ्रमालाय करिराजाय ते नमः ॥
किरीटिने कुण्डलिने मालिने हारिणे तथा ।
नमो मौञ्जीसनाथाय जटिने ब्रह्मचारिणे ॥
शिखिमुण्डाय चण्डाय कमण्डलुधराय च ।
दण्डिने चैव मुण्डाय नमोऽध्ययनशालिने ॥
वेदाध्ययनयुक्ताय सामगानपराय च ।
यक्षाय च वरिष्ठाय नमश्चन्द्रशिखण्डिने ॥

कपर्दिने करालाय शंकरप्रियसूनवे ।
सुताय हैमवत्याश्च हन्त्रे च सुरविद्विषाम् ।।
ऐरावणादिभिर्दिव्यैर्दिग्गजैः संस्तुताय च ।
स्वबृंहितपरित्रस्तैर्नमस्ते मुक्तिहेतवे ।।
कूष्माण्डगणनाथाय गणानां पतये नमः ।
वज्रिणाराधितायैव वज्रिवज्रनिवारिणे ।।
पूष्णो दन्तभिदे साक्षान्मरुतां भीषणाय च ।
ब्रह्मणश्च शिरोहर्त्रे विवस्वद्बन्धनाय च ।।
अग्नेश्चैव सरस्वत्या इन्द्रस्य च बलच्छिदे ।
भैरवाय सुभीमाय भयानकरवाय च ।।
विभीषणाय भीष्माय नागाभरणधारिणे ।
प्रमत्ताय प्रचण्डाय वक्रतुण्डाय ते नमः ।।
हेरम्बाय नमस्तुभ्यं प्रलम्बजठराय च ।
आखुवाहाय देवाय चैकदन्ताय ते नमः ।।
शूर्पकर्णाय शूराय परश्वधधराय च ।
सृणिहस्ताय धीराय नमः पाशासिपाणये ।।
धारणाय नमस्तुभ्यं धारणाभिरताय च ।
धारणाभ्यासयुक्तानां पुरस्तात्संस्तुताय च ।।

प्रत्याहाराय वै तुभ्यं प्रत्याहाररताय च ।
प्रत्याहाररतानां च प्रत्याहारस्थितात्मने ॥

विद्याध्यक्षाय दक्षाय लोकाध्यक्षाय धीमते ।
भूताध्यक्षाय भव्याय गणाध्यक्षाय ते नमः ॥

योगपीठान्तरस्थाय योगिने योगधारिणे ।
योगिनां हृदि संस्थाय योगगम्याय ते नमः ॥

ध्यानाय ध्यानगम्याय शिवध्यानपराय च ।
ध्येयानामपि ध्येयाय नमो ध्येयतमाय च ॥

सप्तपातालपादाय सप्तद्वीपोरुजंघिने ।
नमो दिग्बाहवे तुभ्यं व्योमदेहाय ते नमः ॥

सोमसूर्याग्निनेत्राय ब्रह्मविद्यामदाम्भसे ।
ब्रह्माण्डकुण्डपीठाय सामघोषस्वनाय च ॥

ज्योतिर्मण्डलपुच्छाय हृदयालानकाय च ।
ध्यानाद्रिबद्धपादाय पूजाघोरणधारिणे ॥

सोमार्कबिम्बघण्टाय दिक्कौन्द्रविनोदिने ।
आकाशसरसो मध्ये क्रीडागहनशालिने ॥

सुमेरुदन्तकोशाय पृथिवीस्थलनाय च ।
सुघोषाय सुभीमाय सुरकुञ्जरभेदिने ॥

हेमाद्रिकूटभेत्रे च दैत्यदानवमर्दिने ।
गजाकाराय देवाय गजराजाय ते नमः ।।
ब्रह्मणे ब्रह्मरूपाय ब्रह्मगोत्रेऽव्ययाय च ।
ब्रह्मघ्ने ब्राह्मणायैव ब्रह्मणः प्रियबन्धवे ।।
यज्ञाय यज्ञगोप्त्रे च यज्ञानां फलदायिने ।
यज्ञहर्त्रे यज्ञकर्त्रे सर्वयज्ञमयाय च ।।
सर्वनेत्राधिवासाय सर्वैश्वर्यप्रदायिने ।
गुहाशयाय गुह्याय योगिने ब्रह्मवादिने ।।
"ॐ गं तत्पुरुषाय विद्महे, वक्रतुण्डाय धीमहि,
तन्नो दन्ती प्रचोदयात्" ।।३।।
एकाक्षरपरायैव मायिने ब्रह्मचारिणे ।
भूतानां भुवनेशानां पतये पापहारिणे ।।
सर्वारम्भनिहन्त्रे च विमुखानां निजार्चने ।
नमो नमो गणेशाय विघ्नेशाय नमो नमः ।।
त्रिपुरं दग्धुकामेन पूजिताय त्रिशूलिना ।
दयाशील दयाहार दयापर नमोऽस्तु ते ।।
विनायकाय वै तुभ्यं विकृताय नमोनमः ।
नमस्तुभ्यं जगद्धात्रे नमस्तुभ्यं विनोदिने ।।

नमस्तुभ्यं त्रिनेत्राय त्रिनेत्रप्रियसूनवे ।
सप्तकोटिमहामन्त्रैर्मन्त्रितावयवाय ते ॥

मन्त्राय मन्त्रिणां नित्यं मन्त्राणां फलदायिने ।
लीलया लोकरक्षार्थं विधृतनिजमूर्तये ॥

स्वयं शिवाय देवाय योगक्षेमानुपालिने ।
नमो नमः क्षमाभर्त्रे नमः क्षेमतमाय च ॥

दयामयाय देवाय सर्वभूतदयालवे ।
दयाकर दयारूप दयामूर्ते दयापर ॥

दयाश्राय्य दयासार दयाकृतिरतात्मक ।
जगतां तु दयाकर्त्रे सर्वकर्त्रे नमो नमः ॥

नमः कारुण्यदेहाय वीराय शुभ्रदन्तिने ।
भक्तिगम्याय भक्तानां दुःखहर्त्रे नमोऽस्तु ते ॥

नमः समस्तगीर्वाणवन्दिताङ्घ्रियुगाय ते ।
जगतां तस्थुषां भर्त्रे विघ्नहर्त्रे नमोऽस्तु ते ॥

नमो नमस्ते गणनायकाय
सुनायकायाखिलनायकाय ।
विनायकायाभयदायकाय
नमः शुभानामुपनायकाय ॥

गणाधिराजाय गणानुशास्त्रे
गजाधिराजाय गजाननाय ।
शताननायामितमाननाय
नमो नमो दैत्यविनाशनाय ।।
अनामयायामलधीमयाय
स्वमाययाविष्टजगन्मयाय ।
अमेयमायाधिकसन्मयाय
नमो नमस्तेऽस्तु मनोमयाय ।।
नमस्ते समस्ताधिनाथाय कर्त्रे
नमस्ते समस्तोरुविस्तारभाजे ।
नमस्ते समस्ताधिकायातिभूम्ने
नमस्ते पुनर्व्यस्तविन्यस्तधाम्ने ।।
पात्रे सुराणां प्रमथेश्वराणां
शास्त्रेऽनुशास्त्रे सचराचरस्य ।
नेत्रे प्रनेत्रे च शरीरभाजां
दात्रे वराणां भवते नमोऽस्तु ।।
नमोऽस्तु ते विघ्नविनाशकाय
नमोऽस्तु ते भक्तभयापहाय ।

नमोऽस्तु ते मुक्तमनस्स्थिताय
नमश्च भूयो गणनायकाय ॥

अखिलभुवनभर्त्रे सर्वदायैकदात्रे
निखिलतिमिरभेत्त्रे निष्कलायाव्ययाय ।
प्रणतमनुजगोप्त्रे प्राणिनां त्राणकर्त्रे
सकलविबुधशास्त्रे विश्वनेत्रे नमोऽस्तु ॥

दशनकुलिशभिन्नैर्निर्गतैर्दिग्गजानां
विलसितशुभदन्तं मौक्तिकैश्चन्द्रगौरैः ।
श्रवणकुहरसक्तं प्रेक्ष्य गौरी भवन्तं
सुदृढमथ कराभ्यां श्लिष्यते प्रेमनुन्ना ॥

मृदुनि ललितगीते तन्यरङ्गे भवान्याः
शुभविलसितभावां नृत्यलीलां विधाय ।
अचलदुहितुरङ्कादङ्कमन्यं विसर्प-
न्विदुरुपहरसि त्वं नृत्यहर्षोपहारम् ॥

भुजगवलयितेनोग्रस्पृशान्पाणिना त्वां
सरभसमथ बाहोरन्तराले निवेश्य ।
कलमधुरसुगीतं नृत्तमालोकयंस्ते
कलसहितकलतालं चुम्बते हस्तपद्मे ॥

कुवलयशतशीतैर्भूरिकल्हारहृद्यै-

स्तव मुहुरपि गात्रस्पर्शनैः संप्रहृष्यन् ।

क्षिपति च सुविशाले स्वाङ्कमध्ये भवन्तं

तव मुहुरनुरागान्मूर्ध्नि जिघ्रन्महेशः ।।

बालोऽबालपराक्रमः सुरगणैः संप्रार्थ्यसेऽहर्निशं

गायन्किंपुरुषाङ्गनाविरचितैस्स्तोत्रैरभिष्टूयसे ।

हाहाहूहुकतुम्बुरुप्रभृतिभिस्त्वं गीयसे नारद

स्तोत्रैरद्भुतचेष्टितैः प्रतिदिनं प्रोद्घोषते सामभिः।।

त्वां नमन्ति सुरसिद्धचारणा-

स्त्वां यजन्ति निखिला द्विजातयः ।

त्वां पठन्ति मुनयः पुराविद-

स्त्वां स्मरन्ति यतयः सनातनाः ।।

परं पुराणं गुणिनं महान्तं

हिरण्मयं पुरुषं योगगम्यम् ।

यमामनन्त्यात्मभुवं मनीषिणो

विपश्चितं कविमप्यक्षयं च ।।

गणानान्त्वा गणनाथं सुरेन्द्रं

कविं कवीनामतिमेध्यविग्रहम् ।

ज्येष्ठराजमृषभं केतुमेकमा नः

शृण्वन्नूतिभिः सीद शश्वत् ।।

नमो नमो वाङ्मनसातिभूमये

नमो नमो वाङ्मनसैकभूतये ।

नमो नमोऽनन्तसुखैकदायिने

नमो नमोऽनन्तसुखैकसिन्धवे ।।

नमो नमः शाश्वतशान्तिहेतवे

क्षमादयापूरितचारुचेतसे ।

गजेन्द्ररूपाय गणेश्वराय ते

परस्य पुंसः प्रथमाय सूनवे ।।

नमो नमः कारणकारणाय ते

नमो नमो मङ्गलमङ्गलात्मने ।

नमो नमो वेदविदां मनीषिणा-

मुपासनीयाय नमो नमो नमः ।।३।।

श्रीईश्वर उवाच ।।

वैनायकं स्तवं पुण्यं सर्वपापप्रणाशनम् ।

चिन्ताशोकप्रशमनमायुरारोग्यवर्धनम् ।।

नृपाणां सततं रक्षा द्विजानां च विशेषतः ।

स्तवराज इति ख्यातं सर्वसिद्धिकरं परम् ।।

यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ।
रूपं वीर्यं बलं प्रज्ञां यशश्चायुः समन्वितम् ।।
मनीषां सिद्धिमारोग्यं श्रियमप्यक्षयिष्णुताम् ।
सर्वलोकाधिपत्यं च सर्वदेवाधिराजताम् ।।
प्राप्याष्टगुणमैश्वर्यं प्राप्य भूतिं च शाश्वतीम् ।
उद्धृत्यांसप्तमं वंशं दुस्तराद्भवसागरात् ।।
काञ्चनेन विमानेन शतनागायुतेन च ।
विचरत्यखिलांल्लोकान्सशरीरो गणाधिपः ।।
मत्प्रियश्च भवेन्मर्त्यः सर्वदेवप्रियः सदा ।
प्रियो विनायकस्यापि प्रियोस्माकं विशेषतः ।।
सङ्कल्पसिद्धिः सर्वज्ञः सर्वभूतहिते रतः ।
स्तवराजं जपन्मर्त्यः सुहृद्भिः सह मोदते ।।
स्तवराजजपासक्तभावयुक्तस्य धीमतः ।
अस्मिञ्जगन्त्रयेप्यस्ति नासाध्यं न च दुष्करम् ।।
तस्मात्सर्वप्रयत्नेन स्तवराजं जपेन्नरः ।
सकृज्जप्त्वा लभेन्मुक्तिं दुःस्वप्नेषु भयेष्वपि ।।
सर्वं तरति पाप्मानं ब्रह्मभूतो भवेन्नरः ।
तस्मात्संपूजितो ह्येष धर्मकामार्थसिद्धये ।।

स्तवराजमिमं स्तवोत्तमं प्रलपंश्चैव पठन्स्मरन्नपि ।
कुरुते शुभकर्म मानवः शुभमश्नोति शुभानि चाश्नुते ।
बहुनात्र किमुक्तेन स्तवराजमिमं जपन् ।
सर्वं तद्भद्रमाप्नोति यद्यदिच्छति शाश्वतम् ॥
स्तवानामप्यशेषाणां वरिष्ठोऽयं यतः स्तवः ।
स्तवराज इति ख्यातिं सर्वलोकेषु यास्यति ॥

श्रीनन्दिकेश्वर उवाच ॥

इत्येष स्तवः प्रोक्तः प्रशस्तः शम्भुना स्वयम् ।
सर्वसिद्धिकरो नृणां सर्वाभीष्टफलप्रदः ॥
तस्मादनेन स्तोत्रेण स्तवराजेन मानवः ।
स्तवन्प्रपस्मरन्वापि कुर्वन्निर्वाणमृच्छति ॥
एवं ते कथितं ह्येतत्त्वया परिपृच्छतः ।
विनायकस्य माहात्म्यं प्रतिष्ठार्चनयोर्विधिः ॥
प्रशस्य ब्रह्मणायज्ञः कल्पस्तस्यात्र शोभनः ।
उमेशतत्परं ब्रह्म किं भूयः श्रोतुमिच्छसि ॥

इति विरचयति स त्र्यम्बकः

स्तोत्रमेतद्धरात्मिवदनस्य स्वामिनोऽत्यादरेण।
गुरुवरचरणाम्नात्पूर्णे कृत्वा वराज्ञां
इह पठति वरेण्यं घोरविघ्नौघशान्त्यै ॥

लाक्षासिन्दूरवर्णं सुरवरनमितं मोदकैर्मोदितास्यं
हस्ते दन्तं ददानं हिमकरसदृशं तेजसोग्रं त्रिनेत्रम् ।
दक्षे रत्नाक्षसूत्रं वरपरशुधरं साखुसिंहासनस्थं
गाङ्गेयं रौद्रमूर्तित्रिपुरवधकरं विघ्नभक्षं नमामि ।।

नमताशेषविघ्नौघवारणं वारणाननम् ।
कारणं सर्वसिद्धीनां दुरितार्णवतारणम् ।।

शंकरजगदम्बिकयोरङ्के पङ्केन खेलन्तम् ।
लम्बोदरमवलम्बे स्तम्भेरमराजचारुमुखम् ।।

***

इति श्रीभविष्योत्तर उत्तरखण्डे
श्रीनन्दिकेश्वरसंवादे श्रीगणेशस्तवराजः संपूर्णः ।।

अथ श्रीबहुरूपगर्भस्तोत्रम् ॥

त्रिपञ्चनयनं देवं जटामुकुटमण्डितम् ।
चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेखरम् ॥
पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम् ।
वृश्चिकैरग्निवर्णाभैर्हारेण तु विराजितम् ॥
कपालमालाभरणं खड्गखेटकधारिणम् ।
पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ॥
वरदाभयहस्तं च मुण्डखट्वाङ्गधारिणम् ।
वीणाडमरुहस्तं च घण्टाहस्तं त्रिशूलिनम् ॥
वज्रदण्डकृताटोपं परश्वायुधहस्तकम् ।
मुद्गरेण विचित्रेण वर्तुलेन विराजितम् ॥
सिंहचर्मपरीधानं गजचर्मोत्तरीयकम् ।
अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥
ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत् ।
आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ॥
दक्षिणं तु विजानीयाद्धास्यं चैव विचिन्तयेत् ।
दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसंनिभम् ॥
चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत् ।
स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ॥

ध्यायेद्दै यस्तु युक्तात्मा क्षिप्रं सिध्यति मानवः ।
या सा पूर्वं मया ख्याता अघोरी शक्तिरुत्तमा ।।
भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् ।
यादृशं भैरवं रूपं भैरव्यास्तादृगेव हि ।।
ईषत्करालवदनां गम्भीरविपुलस्वनाम् ।
प्रसन्नास्यां सदाध्यायेद्भैरवीं विस्मितेक्षणाम् ।।

ॐ नमः श्रीस्वच्छन्दभैरवाय।।

ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् ।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ।।
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ।।

श्रीदेव्युवाच।।

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ।।
छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो!
येनाऽऽयासेनरहितो निर्दोषश्च भवेन्नरः ।।

श्रीभैरव उवाच॥

श्रृणु देवि! परं गुह्यं रहस्यं परमाद्भुतम्।
सर्वपापप्रशमनं सर्वदुःखनिवारणम्॥
प्रायश्चित्तेषु सर्वेषु तीव्रेष्वपि विमोचनम्।
सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम्॥
समयोल्लङ्घने घोरे जपादेव विमोचनम्।
भोगमोक्षप्रदं देवि! सर्वसिद्धिफलप्रदम्॥
शतजाप्येन शुद्ध्यन्ति महापातकिनोऽपि ये।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम्॥
कायिकं वाचिकं चैव मानसं स्पर्शदोषजम्।
प्रमादादिच्छया वाऽपि सकृज्जाप्येन शुद्ध्यति॥
यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः।
नित्ये नैमित्तिके काम्ये परस्यार्थात्मनोऽपि वा॥
निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरकम्।
द्रव्यहीने मन्त्रहीने यन्त्रयोगविवर्जिते॥
भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः।
मनोविक्षेपदोषे च विलोपे पशुवीक्षिते॥
विधिहीने प्रमादे च न्यूनत्वे सर्वकर्मसु।
अतः परतरो मन्त्रो नातः परतरा स्तुतिः॥

नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये! ।
इयं समयविद्यानां राजराजेश्वरीश्वरि! ।।
परमाप्यायनं देवि! भैरवस्य प्रकीर्तितम् ।
प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् ।।
स्तवराजमिमं पुण्यं श्रृणुष्वावहिता प्रिये! ।।

अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य श्रीवामदेव ऋषिः अनुष्टुप्छन्दः श्रीबहुरूपभट्टारको देवता आत्मनोवा-ङ्मनःकायोपार्जितपापनिवारणार्थं आधि व्याधि पीडा निवारणार्थं चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः ।।

अघोरमन्त्रेण न्यासं कृत्वा।। प्राणायामं कुर्यात्।।

अथ ध्यानम् ।।

वामे खेटकपाशशार्ङ्गविलसद्दण्डं च वीणाण्टिके
बिभ्राणं ध्वजमुद्गरौ स्वनिभदेव्यङ्कं कुठारं करे।
दक्षेस्यऽङ्कुशकन्दलेषुडमरून्वज्रत्रिशूलाभयान्रु-
द्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः।।

अथ गायत्री।।

ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि ।
तन्नोऽघोरः प्रचोदयात् ।। ३ ।।

अथ मूलम् ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥

ॐ नमः परमाकाशशायिने परमात्मने ।
शिवाय परमशान्तनिरानन्दपदाय ते ॥
अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे ।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥
बोधादिदशधाशब्दबीजभूताय शम्भवे ।
नमः शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे ॥
ऐन्द्रीमङ्गविश्रम्भसमाश्लेषविलासिने ।
नमः समरसास्वादपरानन्दोपभोगिने ॥
भोगापणे नमस्तुभ्यं योगीशैः पूजितात्मने ।
दुर्वानिर्दलनोद्योगसमुल्लासितमूर्तये ॥
*संरम्भसंविक्षोभविसृष्टाखिलजन्तवे ।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥
घोरसंसारसंभोगदायिने स्थितिकारिणे ।
कलादिक्षितिपर्यन्तपालिने विभवे नमः ॥

---

*शरत् इति पाठान्तरम्।

रेचणाय महामोहध्वान्तविध्वंसहेतवे ।
हृदयाम्भोजसंकोचभेदिने शिवभानवे ।।
भोगमोक्षफलप्राप्तिहेतुयोगविधायिने ।
नमः परमनिर्वाणदायिने चन्द्रमौलये ।।
घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये ।
नमः सर्वाय शर्वाय सर्वपाशापहारिणे ।।
रवणाय रवान्ताय नमस्ते रावराविणे ।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ।।
घोषाय परनादान्तश्चराय खचराय ते ।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ।।
रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे ।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ।।
तमः पारप्रतिष्ठाय सर्वान्तपदगाय ते ।
नमः समस्ततत्त्वाध्वव्यापिने चित्स्वरूपिणे ।।
रेवद्वराय रुद्राय नमस्ते रूपरूपिणे ।
परापरपरिस्पन्दमन्दिराय नमो नमः ।।
भरिताखिलविश्वाय योगगम्याय योगिने ।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ।।

चर्च्याय चर्चनीयाय चर्चकाय चरायते ।
रवीन्दुसन्धिसंस्थाय महाचक्रेश ते नमः ॥
सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये ।
सर्वभक्षाय शर्वाय नमस्ते सर्ववेदिने ॥
रम्याय वल्लभाक्रान्तदेहार्धाय वियोगिने ।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥
तन्त्रहेशाय तत्त्वार्थवेदिने थर्ववेदिने ।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥
शक्तिगर्भप्रबोधाय शरण्यायाऽशरीरिणे ।
शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ॥
स्वकुण्डलिनीगर्भप्रबोधप्राप्तशक्तये ।
दस्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥
समस्तव्यस्तसंप्रक्तारोहिमजालोदितात्मने ।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥
स्वारणिसमुद्भूतवह्निज्वालावभासिने ।
घनीभूतविकल्पांशविश्वबन्धविलोपिने ॥
योगिनीस्पन्दनारूढप्रौढिमालब्धगर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृतलाभिने ॥

नमः कोटिसमावेशभरिताखिलसृष्टये ।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ।।
महामोहमलाक्रान्तजीववर्गावबोधिने ।
महेश्वराय जगतां नमः कारणबन्धवे ।।
स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये ।
नमस्तेऽस्तु महादेवनाम्ने परस्वधात्मने ।।
रुग्द्राविणे महावीर्यरुरुवंशविनाशिने ।
रुद्राय द्रविताशेषबन्धनाय नमोऽस्तु ते ।।
द्रवत्पररसास्वादचर्वणोद्युक्तशक्तये ।
नमस्त्रिदशपूज्याय सर्वकारणहेतवे ।।
रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे ।
त्र्यम्बकाय त्रिधामान्तश्चारिणे *च त्रिचक्षुषे ।।
पेशलोपायलभ्याय भक्तिभाजां महात्मनाम् ।
दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ।।
भवप्रदाय दुष्टानां भवाय भवभेदिने ।
भव्यानां तन्मयानां तु सर्वदाय नमोनमः ।।
अणूनां मुक्तये घोरघोरसंसारदायिने ।
घोरातिघोरमूढानां तिरस्कर्त्रे नमोनमः ।।

---

*चित्रचक्षुषे इति पाठान्तरम् ।

सर्वकारणकलापकल्पितो-

ल्लाससंकुलसमाधिविस्तराम् ।

हार्दकोकनदसंस्थितामपि

तां प्रणौमि शिववल्लभामजाम् ॥

सर्वजन्तुहृदयाब्जमण्डलो-

द्भूतभावमधुपानलुम्पटाम् ।

वर्णभेदविधवान्तरस्थितां

तां प्रणौमि शिववल्लभामजाम् ॥

***

इति श्रीललितस्वच्छन्दे श्रीबहुरूपगर्भस्तोत्रराजः संपूर्णः ॥

***

श्रीसाम्बपञ्चाशिका ।।

***

पुष्णन् देवानमृतविसरैरिन्दुमास्राव्य सम्यग्-
भाभिः स्वाभी रसयति रसं यः परं नित्यमेव ।
क्षीणं क्षीणं पुनरपि च तं पूरयत्येवमीदृग्-
दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकम् ।।

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डलम् ।
भास्वद्वर्णपदक्रमैरिततमः सप्तस्वराश्वैर्वियद्-
विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ।।१।।

ओमित्यन्तर्नदति नियतं यः प्रतिप्राणिशब्दो
वाणी यस्मात्प्रसरति परा शब्दतन्मात्रगर्भा ।
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ।।२।।

यस्त्वक्चक्षुःश्रवणरसनाघ्राणपाण्यङ्घ्रिवाणी-
पायूपस्थस्थितिरपि मनो बुद्ध्यहंकारमूर्तिः ।
तिष्ठत्यन्तर्बहिरपि जगद्भासयन्द्वादशात्मा
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ।।३।।

या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानत्र प्रकटकरणैः प्राणसङ्गात्प्रसूतान् ।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥४॥

ऊर्ध्वाधःस्थान्यतनुभुवनान्यन्तरा संनिविष्टा
नानानाडिप्रसवगहना सर्वभूतान्तरस्था ।
प्राणापानग्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥५॥

न ब्रह्माण्डव्यवहितपथा नातिशीतोष्णरूपा
नो वा नक्तंदिवमसितातापनीयापराहुः ।
वैकुण्ठीया तनुरिव रवेः राजते मण्डलस्था
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥६॥

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद्विन्दुरूपं
योगीन्द्राणां यदपि परमं भाति निर्वाणमार्गः ।
त्र्याहारः प्रणव इति यन्मण्डलं चण्डरश्मे-
रन्तः सूक्ष्मं बहिरपि बृहन्मुक्तयेऽहं प्रपन्नः ॥७॥

यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः ।

यस्मिन्वेदा मधुनि सरघाकारवद्भान्ति चाग्रे
तच्चण्डांशोरमितममृतं मण्डलस्थं प्रपद्ये ।।८।।
ऐन्द्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण
क्रान्ताः सप्त प्रकटहरिणा येन पादेन लोकाः ।
धृत्वा ध्वान्तं विगलितबलिव्यक्ति पातालीनं
विश्वालोकः स जयति रविः सत्त्वमेवोर्ध्वरश्मिः ।।९।।
ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदन्तं
दृष्ट्वा चान्तः प्रणवमुखरं व्याहृतीः सप्त्युक्त्वा ।
यत्तद्वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं
तद्भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये ।।१०।।
त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्विनाशाय युक्तः ।
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
विद्योपायः पर इति बुधैर्गीयते खल्वविद्या ।।११।।
योऽनाद्यन्तोऽप्यतनुरगुणोऽणोरणीयान्महीया-
न्विश्वाकारः सगुण इति वा कल्पनाकल्पिताङ्गः ।
नानाभूत प्रकृतिविकृतीर्दर्शयन्भाति यो वा
तस्मै तस्मै भवतु परमादित्य नित्यं नमस्ते ।।१२।।

तत्त्वाख्याने त्वयि मुनिजनाः नेति नेति ब्रुवन्तः

श्रान्ताः सम्यक्त्वमिति न च तैरीदृशो वेत्ति चोक्तः ।

तस्मात्तुभ्यं नम इति वचोमात्रमेवास्मि वच्मि

प्रायो यस्मात्प्रसरति तरां भारती ज्ञानगर्भा ॥१३॥

सर्वाङ्गीणः सकलवपुषामन्तरे योऽन्तरात्मा

तिष्ठन्काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः ।

यश्च प्राणारणिषु नियतैर्मथ्यमानासु सद्भि-

र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते ॥१४॥

स्तोता स्तुत्यः स्तुतिरिति भवान्कर्तृकर्मक्रियात्मा

क्रीडत्येकस्तव नुतिविधावस्वतन्त्रस्ततोऽहम् ।

यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं

त्वत्तो ह्यन्यत्किमिव जगतां विद्यते तन्मृषा स्यात् ॥१५॥

ज्ञाने नान्तःकरणरहिते विद्यतेऽस्मद्विधानां

त्वं चात्यन्तं सकलकरणागोचरत्वादचिन्त्यः ।

ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-

स्तस्माद्भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः ॥१६॥

हार्दं हन्ति प्रथममुदिता या तमः संश्रितानां

स्वर्लोकात्तदनु च रजः कर्मयोगक्रमेण ।

ग्नप्यत्ता च प्रथयतितरां सत्त्वमेव प्रपन्नः
निर्वाणाय व्रजति शमिनां तेऽर्क भक्तिस्त्वयीव।।१७।।
गाराध श्रियमिव गृहे कामधेनुं प्रवासे
मार्गो शान्तिं धृतिमिव वने योजने ब्रह्मनाडिम् ।
माद्य घोरार्णिन्विषमविषयग्राहसंसारसिन्धौ
पोतेयं ते परमममृतं यन्न शीतं न चोष्णाम्।।१८।।
आपोमावखिलजगतः कारणं तौ मयूखैः
आदाने सृजसि भगवन्ह्रासवृद्धिक्रमेण ।
तावेयान्तर्विषुवति समौ जुह्वतामात्मवह्नौ
तत्परतं नयसि युगपन्मुक्तये भक्तिभाजाम्।।१९।।
स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं ह्यनन्तं
सूक्ष्मत्वं वा तदपि सदसद्व्यक्त्यभावादचिन्त्यम् ।
ध्यायामीत्थं कथमविदितं त्वामनाद्यन्तमन्त-
स्तस्मादर्क प्रणयिनि मयि स्वात्मनैव प्रसीद।।२०।।
यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमन्त-
स्तत्सद्व्यक्तिं जिगमिषु शनैर्लाति मात्रा कलाः खे।
अव्यक्तेन प्रणववपुषा बिन्दुनादोदितं स-
च्छब्दब्रह्मोच्चरति करणव्यञ्जितं वाचकं ते।।२१।।

प्रातःसंध्यारुणकिरणभागृङ्मयं राजसं य-
न्मध्ये चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा ।
सायं सामासितकिरणं यत्तमोल्लासि रूपं
साहुः सर्गस्थितिलयविधावाकृतिस्ते त्रयीव ॥२२॥
ये पातालोदधिभुवि नरद्वीपलोकाधिरूढ-
च्छन्दोभूतस्वरसुरुभदन्तस्पसर्ति प्रपन्नाः ।
ते चैकार्थं निरवयवर्णभावपात्राधिरूढं
ते त्वामेव स्वरगुणकलावर्जितं यान्त्यनन्तम् ॥२३॥
दिव्यं ज्योतिः सकलपवनैः पूरयित्वा त्रिलोकी-
मेकीभूतं पुनरपि च तत्सारमादाय गोभिः ।
अन्तर्लीनो विशसि वसुधां तत्र तैः सूर्यसंज्ञं
तत्र प्राणास्त्वमिति जगतां प्राणभृत्त्वं त्वमात्मा ॥२४॥
अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे ।
धर्माधर्मौ सदसदुभयं योऽन्तरावेश्य योगी
स्वेतात्मन्युपरतमतिर्निर्गुणं त्वां विशेत्तः ॥२५॥

प्राणापानप्रसरविषये सुप्तयोरिन्दुभासा
दाम्पत्येनाभिमुखमिव खे कान्तयोर्मध्यसंस्थः ।
द्यावापृथ्व्योर्वदनकमले गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन्षड्रसास्वादलोलः ।।२६।।
[illegible] पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवम् ।
आमावस्यं विघसमिव खे तत्कलाशेषमश्नन्
ब्रह्माण्डान्तर्गृहपतिरिव स्वात्मयागं करोषि।।२७।।
कृत्वा नक्तंदिनमिव जगद्बीजमाव्यक्तिकं य-
त्रैवान्तर्दिनकर तथा ब्राह्ममन्यत्ततोऽल्पम् ।
दैवं पित्र्यं क्रमपरिगतं मानुषं चाल्पमल्पं
कुर्वन्कुर्वन्कलयसि जगत्पञ्चधावर्तनाभिः ।।२८।।
तत्त्वालोके तपन सुदिने ये परं संप्रबुद्धाः
ये वा चित्तोपशमरजनीयोगनिद्रामुपेताः ।
तेऽहोरात्रोपरमपरमानन्दसंध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यान्ति निर्वाणसंज्ञम्।।२९।।

आब्रह्मेदं नवमिव जगज्जङ्गमस्थावरान्तं
सर्गे सर्गे विसृजसि रवे गोभिरुद्रिक्तसोमैः ।
दीप्तैः प्रत्याहरसि च लये तद्यथायोनि भूयः
सर्गान्तादौ प्रकटविभवां दर्शयन्रश्मिलीलाम् ॥३०॥

श्रित्वा नित्योपचितमुचितं ब्रह्मतेजः प्रकाशं
रूपं सर्गस्थितिलयमुचां सर्वभूतेषु मध्ये ।
अन्तेवासित्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा ॥३१॥

लोकाः सर्वे वपुषि नियतं ते स्थितास्त्वं च तेषा-
मेकैकस्मिन्युगपदगुणो विश्वहेतोर्गुणीव ।
इत्थंभूते भवति भगवन् त्वदन्योऽस्मि सत्यं
किन्तु त्वत्तः परमपुरुषोऽहं प्रकृत्यैव चाज्ञः ॥३२॥

संकल्पेच्छाद्यखिलकरणप्राणवाण्यो वरेण्याः
संपन्ना मे त्वदभिनवनाज्जन्म चेदं शरण्यम् ।
सत्ये चास्ते जिगमिषु शनैः पुण्यपापद्वयं त-
त्क्लिश्नाते तव चरणयोरन्यथा नो भवेताम् ॥३३॥

सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्त-
स्तत्राप्येकं तव नुतिफलं जन्म याचे तदित्थम् ।
त्रैलोक्येशः शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्याम् ।।३४।।

सौषुम्णेन त्वममृतपथेनैत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄन् शान्तभाभिः कलाभिः ।
पश्चादम्भो विशसि विविधाश्चौषधीस्तद्गतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रतार्क ।।३५।।

मन्दाक्रान्ते तमसि भवता नाथ दोषावसाने
नान्तर्लीना मम मतिरियं गाढनिद्रां जहाति ।
तस्मादस्तंगमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर परं नीयतामाशु बोधम् ।।३६।।

येन ग्रासीकृतमिव जगत्सर्वमासीत्तदस्तं
ध्वान्तं नीत्वा पुनरपि विभो तद्दयाघ्रातचित्तः ।
धत्से नक्तंदिनमपि गती शुक्लकृष्णे विभज्य
त्राता तस्माद्भव परिभवे दुष्कृते मेऽपि भानो ।।३७।।

आसंसारोपचितसदसत्कर्मबन्धाश्रिताना-
माधिव्याधिप्रजनमरणक्षुत्पिपासार्दितानाम् ।
मिथ्याज्ञानप्रबलतमसा नाथ चान्धीकृतानां
त्वं नस्त्राता भव करुणया यत्र तत्र स्थितानाम् ॥३८॥

सत्यासत्यस्खलितवचसां शौचलज्जोज्झिताना-
मज्ञानानामफलसफलप्रार्थनाकातराणाम् ।
सर्वावस्थास्वखिलविषयाध्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणाम् ॥३९॥

यावद्देहं जरयति जरा नान्तकादेत्य दूती
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः ।
गाढं कण्ठे लगति सहसा जीवितं लेलिहान-
स्तावत्क्षिप्राभयद सदयं श्रेयसे नः प्रसीद ॥४०॥

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं दहननयनोद्दामदंष्ट्राकरालम् ।
यावद्दृष्ट्वा व्रजति न भिया पञ्चतामेष कायः
तावन्नित्यामृतमय त्वं पाहि नः कान्दिशीकान् ॥४१॥

शब्दाकारं वियदिव वपुस्ते यजुःसामधाम्नः
गाथाश्छन्दांस्यपि च तुरगा ऋङ्मयं मण्डलं च ।
एवं सर्वश्रुतिमयतया मद्दयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रन्दमाकर्णयेमम् ।।४२।।
नाशं नास्मच्चरणशरणा यान्त्यपि ग्रस्यमानाः
दैवैरित्थं सितमिव यशो दर्शयन्स्वं त्रिलोक्याम् ।
मन्ये सोमं क्षततनुमसागर्भवृद्ध्या विवस्व-
[illegible]च्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा ।।४३।।
आस्तां जन्मप्रभृति भवतः सेवनं तद्धि लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम् ।
ज्योतिर्मात्रं स्मृतिपथमितो जीवितान्तेऽपि भास्व-
न्निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः ।।४४।।
अप्रत्यक्षत्रिदशभजनाद्यत्परोक्षं फलं त-
त्पुंसां युक्तं भवति हि समं कारणेनैव कार्यम् ।
प्रत्यक्षस्त्वं सकलजगतां यत्समक्षं फलं मे
युष्मद्भक्तेः समुचितमतस्तत्तु याचे यथा त्वाम् ।।४५।।

ये चारोग्यं दिशति भगवान्सेवितोऽप्येवमाहु-
स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः ।
भुक्तेर्मुक्तेरपि च जगतां यत्र पूर्णं सुखानां
तस्यान्योऽर्कादमृतवपुषः को हि नामास्तु दाता ॥४६॥

हित्वा हित्वा गुरुचपलतामप्यनेकान्निजार्था-
न्यैरेकार्थीकृतमिव भवत्सेवनं मत्प्रियार्थम् ।
तेषामिच्छास्वनुकृतिमहं स्वेन्द्रियाणां प्रियाणा-
मादौ तस्मान्मम दिनपते देहि तेभ्यः प्रसादम् ॥४७॥

किं तस्याप्युच्चरति वचनं यस्य नोङ्कारकस्त्वं
किं तद्वाच्यं सकलवचसां विश्वमूर्ते न यत्त्वम् ।
तस्मादुक्तं यदपि तदपि त्वत्स्तुतौ भक्तियोगा-
दस्माभिस्तत्क्षमतु भगवंस्त्वत्प्रसादेन धन्यम् ॥४८॥

या पन्थानं दिशति शिशिरांशुत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडाद्यम् ।
तस्यास्त्वन्या विधुरदिविजन्मस्वसा कृत्स्नशून्या
धन्या काचित्प्रकृतिपुरुषावन्तरा मेऽस्तु वृत्तिः ॥४९॥

[illegible]न्मन इव पिबन्सेतुबन्धस्य मध्ये
[illegible]पेयं ध्रुवपदमथो व्यक्तमुद्घाल्य तालु ।
[illegible]दूर्ध्वं किमपि परमं व्योम सोमाग्निशून्यं
[illegible]यं त्वां सुरपितृगती चान्तरा ब्रह्मभूतः ।।५०।।

[illegible]त्वं सवितुरिति यो वाङ्मनःकायबुद्ध्या
[illegible]पोपशमसमतायोगमेवारुरुक्षुः ।
[illegible]धर्मग्रसनरशनामुक्तये युक्तियुक्तां
[illegible] श्रीसाम्बः स्तुतमिति रवेः सुप्रशान्तां चकार ।।५१।।

[illegible]श्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं
श्रीसाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।
[illegible]ः सावित्रं पठति नियतं स्वात्मवत्सर्वलोका-
[illegible]श्यन्सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ।।५२।।

इति परमरहस्यश्लोकपञ्चाशदेषा
तपननवनपुण्या सागमब्रह्मचर्चा ।
हरतु दुरितमस्मद्वर्णिताकर्णिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजाम् ।।५३।।

***

श्रीस्वात्मसंविदभिन्नरूपशिवार्पणमस्तु ।
समाप्तं चेदं साम्बपञ्चाशिकाशास्त्रम् ।।

***

(नवग्रह होम के समय इस
निम्नलिखित मन्त्र का उच्चारण अवश्य करें।)

नमः सूर्याय सोमाय मंगलाय बुधाय च ।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥

***

अथ मुकुन्दमाला

***

ॐ वन्दे मुकुन्दमरविन्ददलायताक्षं
कुन्देन्दुशङ्खदशनं शिशुगोपवेषम् ।
इन्द्रादिदेवगणवन्दितपादपीठं
वृन्दावनालयमहं वसुदेवसूनुम् ।।१।।

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द! ।।२।।

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ।।३।।

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ।।४।।

श्रीमुकुन्दपदाम्भोजमधुनः परमाद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥५॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्यारामामृदुतनुलतानन्दनेनापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥६॥

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्भव्यं भवतु भगवन्पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥७॥

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥८॥

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमेह चित्त रन्तुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥९॥

मा भीर्मन्द मनो विचिन्त्य बहुधा यामीश्चिरं यातना
नैवामी प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ।।१०।।

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मास्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ।।११।।

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावे प्रसीद ।।१२।।

पृथ्वी रेणुरणुः पयांसि कणिका फल्गुः स्फुलिङ्गोलघु-
स्तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुराः
दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ।।१३।।

आम्नायाभ्यसितान्यरण्यरुदितं कृच्छ्रव्रतान्यन्वहं
मेदच्छेदफलानि पूर्तविधयः सर्वं हुतं भस्मनि ।

तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
द्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः ॥१४॥

आनन्द गोविन्द मुकुन्द राम
नारायणानन्त निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चित्
अहो! जनानां व्यसनानि मोक्षे ॥१५॥

क्षीरसागरतरङ्गशीकरा-
सारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने
माधवाय मधुविद्विषे नमः ॥१६॥

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणात्
औदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।
सेव्यः श्रीपतिरेव सर्वजगता-
मेकान्ततः साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट्
पाञ्चाल्यहल्या ध्रुवः ॥१७॥

नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति ।

पुरुषाधमं कतिपयग्रामेशमल्पार्थदं

मृगयामहे नरमहो मूढा वराका वयम् ।।१८।।

श्रृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां

समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः ।

ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां

परमौषधं वितनुते निर्वाणमात्यन्तिकम् ।।१९।।

नाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः

स्वरगद्गदेन नयनोद्गीर्णेन बाष्पाम्बुना ।

त्वच्चरणारविन्दयुगलध्यानामृतास्वादिना-

सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ।।२०।।

ब्रुवाणानि परं परस्माद्

अहो क्षरन्तीव सुधां पदानि ।

आवर्तय प्राञ्जलिरस्मि जिह्वे!

नामानि नारायणगोचराणि ।।२१।।

शरीरं परिणामपेशलं

पतत्यवश्यं श्लथसन्धिजर्जरम् ।

किमौषधैः क्लिश्यसि मूढ दुर्मते

निरामयं कृष्णरसायनं पिब ।।२२।।

श्रीमन्नाम प्रोच्य नारायणाख्यं
केन प्राप्ता वाञ्छितं पापिनोऽपि ।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिं-
स्तेन प्राप्तं गर्भवासादिदुःखम् ॥२३॥

मा द्राक्षं क्षीणपुण्यान्क्षणमपि भवतो
भक्तिहीनान्पदाब्जे
मा श्रौषं श्राव्यबन्धं तव
चरितमपास्यान्यदाख्यानजातम् ।
मास्मार्षं माधव त्वामपि
भुवनपते चेतसाऽपह्नुवानं
मा भूवं त्वत्सपर्याव्यतिकररहितो
जन्मजन्मान्तरेऽपि ॥२४॥

मदन परिहर स्थितिं मदीये
मनसि मुकुन्द पदारविन्दधाम्नि ।
हरनयनकृशानुना कृशोऽसि
स्मरसि न चक्रपराक्रमं मुरारेः ॥२५॥

दारा वाराकरवरसुता तेऽङ्गजोऽयं विरिञ्चिः
स्तोता वेदास्तव सुरगणो भृत्यवर्गः प्रसादः ।

[illegible] जगदविकलं तावकी देवकीयं
[illegible] र्लरिपुसुतस्तत्त्वतोन्यत्र जाने॥२६॥
जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युत कथाः श्रोत्रद्वय त्वं श्रणु ।
कृष्णं लोकय लोचनद्वय
हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं
मूर्धन्नमाधोक्षजम्॥२७॥
[illegible] प्रणिपातधूलिधवलं तद्वैशिरःस्याच्छुभं
ते नेत्रे तमसोज्झिते सुरुचिरेयाभ्यां हरिर्दृश्यते ।
सा बुद्धिर्नियमैर्यमैश्च विमला या माधवध्यायिनी
सा जिह्वाऽमृतवर्षिणी प्रतिपदं चा स्तौति नारायणम्॥२८॥
[illegible] प्रभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणि-
गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः ।
[illegible] कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो ध्येयशिखामणिर्दिशतु नो गोपालचूडामणिः॥२९॥
शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुदिततमसां संघनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम्॥३०॥

व्यामोहोद्दलनौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्यानर्थकरौषधं त्रिभुवने सञ्जीवनैकौषधम् ।
भक्तार्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम् ॥३१॥

आश्चर्यमेतद्धि मनुष्यलोके सुधां
परित्यज्य विषं पिबन्ति ।
नामानि नारायणगोचराणि
त्यक्त्वान्यवाचः कुहकाः पठन्ति ॥३२॥

लाटी नेत्रपुटी पयोधरघटी क्रीडाकुटी दोस्तटी
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जनार्दनेति जगतां नाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति ॥३३॥

अपाय्यसंक्लेशवधादपायमपाय्यमक्षय्यमदुर्भरं मे ।
अस्त्येव पाथेयमितिप्रयाणे श्रीकृष्णनामामृतभागधेयम् ॥

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रे द्विजन्मपरिवारशिवावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता स्तुतिरियं कुलशेखरेण ॥३५॥

इति श्रीकुलशेखरराजकृता
मुकुन्दमाला स्तुतिः सम्पूर्णा ॥

रुद्रपञ्चके चमकानुवाक्यम् ।

***

ॐ नमः शिवाय ।।

***

प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ।।
देवं सुधाकलशसोमकरं त्रिनेत्रं
पद्मासनं च वरदाऽभयदं सुशुभ्रम् ।
हस्ताऽभयाब्जवरभूषितया च देव्या
वामेऽङ्कितं शमनभङ्गहरं नमामि ।।
शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ।।१।।
नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ।।२।।
कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिकम् ।
ज्वलन्तं पिङ्गलजटाशिखमुद्योतकारिणम् ।।३।।
अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ।।४।।

दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमऽव्ययम् ॥५॥
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजः सम्यक्ततो यजनमारभेत् ॥६॥
मृत्युञ्जय महादेव पाहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं भवबन्धनैः ॥७॥
आराधितो मनुष्यैस्त्वं सिद्धैर्देवैर्महर्षिभिः ।
आवाहयामि भक्त्या त्वां गृहाणार्चां महेश्वर ॥८॥
हर! शम्भो! महादेव! विश्वेशामरवल्लभ! ।
शिव शङ्कर सर्वात्मन् नीलकण्ठ नमोऽस्तु ते ॥९॥
इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बकम् ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं रोगनाशनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं हृदयपोषणम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

ॐ आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह केतुमद्भिर्वाताजवेन बलमद्भिर्मनोजवा यातु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् ।।

आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् ।
वृषभासनमारूढं नागाभरणभूषितम् ।।१।।
प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः ।
शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः ।
बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम्।।२।।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ।।३।।

ॐ शतरुद्रियन्देवानां रुद्रशमनं,

भवाय शर्वायश्च प्रत्युत्क्रान्तानुवाकौ

देवर्षी रुद्रदैवत्यस्त्रिष्टुप्च्छन्दश्चयने विनियोगः ।

नमस्ते देवा रौद्रमानुष्टुभमाद्या गायत्री पञ्चमषष्ठ्यौ

पांक्त्यन्ता महापंक्तिर्मा भैरेकपदा जगत्यनुष्टुप्त्रिष्टुप्

महाबृहती यवमध्या रुद्रो देवता चरमेष्टिका अस्य

रुद्रस्य प्रश्नस्य अनुष्टुप्च्छन्दः

अघोर ऋषिः सङ्कर्षणमूर्तिः सुरूपो

योऽसावादित्यः परः पुरुषः स एव देवता अग्निः

क्रतुचरुमायामिष्टिकायां शतरुद्रे विनियोगः ।

सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता

एका गायत्री छन्दस्तिस्त्रोऽनुष्टुभस्तिस्त्रः पङ्क्तयः

सप्ताऽनुष्टुभौ, द्वे जगत्यौ, परमेष्ठी ऋषिः

आत्मनोवाङ्मनः कायोपार्जितपापनिवारणार्थं

सद्गुरुप्रसाद प्राप्त्यर्थं चमानुवाकसहितरुद्रमन्त्र

(पाठे/होमे/स्नाने/पुष्पार्चने) विनियोगः ॥

ॐ कर्पूरगौरं करुणावतारं

संसारसारं भुजगेन्द्रहारम्।

सदा वसन्तं हृदयारविन्दे

भवं भवानीसहितं नमामि।।

गात्रं भस्मसितं सितं च हसितं

हस्ते कपालं सितं

खट्वाङ्गं च सितं सितं च वृषभं

कर्णे सिते कुण्डले।

गङ्गाफेनसितो जटाजलसित-

श्चन्द्रः सितो मूर्धनि

सोऽयं सर्वसितो ददातु विभवं

पापक्षयं शङ्करः ।।

"ॐ आशुः शिशान इति शुक्रज्योतिश्चानंशुः प्रजननं सर्वाः प्रजाः कश्यपा इति कश्यपस्य वाजस्य प्रसवोऽग्रे:" ॥

ॐ आशुः शिशानो वृषभो न युध्मो
घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिष एकवीरः
शतं सेना अजयत्साकमिन्द्रः ॥१॥

सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना
युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं
युधो नर इषुहस्तेन वृष्णा ॥२॥

स इषुहस्तैः स निषङ्गिभिर्वशी
संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा
प्रतिहिताभिरस्ता ॥३॥

बृहस्पते परिदीया रथेन रक्षोहा
मित्राँ अपबाधमानः ।
प्रभञ्जन्सेनाः प्रमृणो युधा
जयन्नस्माकमेध्यविता रथानाम् ॥४॥

बलविज्ञायः स्थविरः प्रवीरः

सहस्वान्वाजी सहमान उग्रः ।

अभिवीरो अभिषत्वा सहोजिज्जैत्रायनो

रथमाऽतिष्ठ गोवित् ।।५।।

गोत्रभिदङ्गोविदं वज्रबाहुं

जयन्तमऽज्मा प्रमृणन्तमोजसा ।

इमं स जाता अनुवीरयध्वमिन्द्र-

सखायमऽनुसंव्ययध्वम् ।।६।।

अभिगोत्राणि सहसा गाहमानोऽदयो

वीरः शतमन्युरिन्द्रः ।

दुश्च्यवनः पृतनाषाडऽयुध्योऽस्माकं

सेना अवन्तु प्रयत्सु ।।७।।

इन्द्र एषां नेता बृहस्पतिर्दक्षिणो यज्ञः

पुर एतु सोमः ।

देवसेनानामभिभञ्जतीनां जयन्तीनां

मारुतो यन्तु मध्ये ।।८।।

इन्द्रस्य वृष्णो वरुणस्य राज्ञः

आदित्यानां मरुतां शर्ध उग्रम् ।

महामनसां भुवनस्य वानां घोषो

देवानां जयतामुदस्थात् ॥९॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वऽस्माकं

या इषवस्ता जयन्तु ।

अस्माकं वीरा उत्तरे भवन्त्वऽस्मानु

देवा अवता भरेषु ॥१०॥

(होम पर आग्नेय कोणपर खड़ा होके

घृतधाराकी अच्छिन्न आहुति

"वर्त्तानो भवन्तु"

तक देना)॥

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च

सत्यज्योतिश्च ज्योतिष्मांश्च

सत्यश्चर्तपाश्चात्यंहाः, ईदृङ् चान्यादृङ् च,

सदृङ् च, प्रतिसदृङ् च,

मितश्च, सम्मितश्च,

सभराः, ऋतश्च,

सत्यश्च, ध्रुवश्च,

धरुणश्च, धर्ता च,

विधर्ता च, विधारय,

ऋतजिच्च, सत्यजिच्च,

सेनाजिच्च, सुषेणश्चान्तिमित्रश्च,

दूरे अमित्रश्च, गण ईदृक्षास,

एतादृक्षास, ऊषुणः सदृक्षासः,

प्रतिसदृक्षास, एतानभितासश्च,

संमितासो,

नो अद्य सभारसो मरुतो यज्ञे

अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनु वर्त्मानो

यथेन्द्रन्दैवीर्विशो मरुतोऽनु

वर्त्मानोऽभवन्नेवमिमं यजमानं

दैवीश्च विशो मानुषीश्चानु वर्त्मानो भवन्तु ।।

ॐ विजय जय प्रदाय शवराय वराय नमः ।

सकल कलंक संकर हराय हराय नमः ।।

जगदगदप्रगल्भ विभवाय भवाय नमः ।

प्रवर वर प्रकाशितशिवाय शिवाय नमः ।।

ॐ नमः शिवाय वरदाय ॐ नमस्ते रुद्र मन्यवे ।

बाहुभ्यामुत ते नम उत त इषवे नमः ।।१।।

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि ।।२।।

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ।।३।।

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ।।४।।

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहींश्च सर्वाञ्जम्भयन्सर्वांश्च

यातुधान्योऽधराचीः परासुव ।।५।।

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।

ये चेमे रुद्रा अभितो दिक्षु श्रिताः

सहस्रशो वैषां हेड ईमहे ।।६।।

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।

उतैनं गोपा अदृश्रन्नुदहार्यः ।।७।।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।।८।।

अथो य अस्य सत्त्वानोऽहन्तेभ्योऽकरं नमः ।

प्रमुञ्च धन्वनस्तमुभयोरात्र्योर्ज्याम् ।।९।।

याश्च ते हस्त इषवः परास्ता भगवो वप ।

विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत ।।१०।।

अनेशन्नस्येषव आभूरस्य निषङ्गथिः ।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।।११।।

तयाऽस्मान्विश्वतस्त्वमयक्ष्मेण परिभुज ।

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।।१२।

अथो य इषुधिस्तवारे अस्मन्निधीहितम् ।

नमांसि त आयुधायाऽनातताय धृष्णवे ।।१३।।

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।

अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे ।।१४।।

निशीर्य शल्यानां मुखं शिवो नः सुमना भव ।

या त इषुः शिवतमा शिवं बभूव ते धनुः ।

शिवा शरव्या या तव तया नो मृड जीवसे ।।१५।।

मानो महन्तमुत मानो अर्भकं

मान उक्षन्तमुत मान उक्षितम् ।

मानो वधीः पितरं मोत मातरं

मा नः प्रियास्तन्वो रुद्र रीरिषः ।।१।।

मानस्तोके तनये मान आयौ

मानो गोषु मानो अश्वेषु रीरिषः ।

वीरान्मानो रुद्र भामितो

वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥२॥

नमस्ते अस्तु भगवः परमेश्वर विश्वेश्वर महादेव

शिव सशिव सदाशिव त्रिकालकाल कालाग्निरुद्र

नीलकण्ठ अमृतेश्वरभैरव बहुरूप अघोर तत्पुरुष

महामृत्युञ्जयमहारुद्र ते नमो नमः ॥

अग्राविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरागतम् ॥

(केवल फूल डालना)

(कृपया सस्वर पढते समय "चमे" और "चम" का विशेष ध्यान रखे । नहीं तो यह अर्थ का अनर्थ होगा ।)

१	२	३
वाजश्चमे	प्रसवश्चमे	प्रयतिश्चमे
प्रसितिश्चमे	धीतिश्चमे	क्रतुश्चमे
स्वरश्चमे	श्लोकश्चमे	श्रावश्चमे
श्रुतिश्चमे	ज्योतिश्चमे	स्वश्चमे
प्राणश्चमे	व्यानश्चमे	अपानश्चमे
असुश्चमे	चित्तं चम	आधीतंचमे
वाक्चमे	मनश्चमे	चक्षुश्चमे
श्रोत्रं चमे	दक्षश्चमे	बलंचमे
ओजश्चमे	सहश्चम	आत्माचमे
तनूश्चमे	शर्म चमे	वर्म चमे
अङ्गानि चमे	अस्थीनि चमे	
परूंषि चमे	शरीराणिचम	
आयुश्चमे	जराचमे ।।	

यज्ञेन कल्पताम् ।।

ॐ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो।

नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो।।

नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो।

नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो ।।

नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो ।

नमो भवस्य हेत्यै जगताम्पतये नमो ।।

नमो रुद्रायाऽततायिने क्षेत्राणां पतये नमो ।

नमः सूतायाऽहन्त्याय वनानां पतये नमो ।।

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो ।

नमो मन्त्रिणे वाणिज्याय कक्षाणां पतये नमो।

नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः।

नम आक्रन्दयत उच्चैर्घोषाय

सत्वानां पतये नमो ।

नमः कृत्स्नवीताय धावते पत्तीनां पतये नमः ।।

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरागतम् ।।

(केवल मूल वाला)

१ २ ३

ज्यैष्ठ्यंचम	आधिपत्यं चमे	मन्युश्चमे
भामश्चमे	अमश्चमे	अम्भश्चमे
जेमाचमे	महिमाचमे	वरिमाचमे
प्रथिमाचमे	वर्ष्मा चमे	द्राघ्वाचमे
वृद्धं चमे	वृद्धिश्चमे	सत्यंचमे
श्रद्धाचमे	जगच्चमे	धनंचमे
वशश्चमे	मोदश्चमे	वशश्चमे
त्विषिश्चमे	सूक्तंचमे	सुकृतंचमे
जातंचमे	जनिष्यमाणं चमे	
वित्तंचमे	वेद्यंचमे	भूतंचमे
भविष्यं चमे	सुगंचमे	सुपथं चमे
ऋद्धंचम	ऋद्धिश्चमे	क्लृप्तं चमे
क्लृप्तिश्चमे	मतिश्चमे	सुमतिश्चमे।।

यज्ञेन कल्पताम् ।।

नमः सहमानाय निव्याधिन
आव्याधिनीनां पतये नमो ।

नमो निषिङ्गिणे ककुभाय
स्तेनानां पतये नमो ।।१।।

नमो वञ्चते परिवञ्चते

स्तायूनां पतये नमो ।

नमो निचराय परिचराया-

ऽरण्यानां पतये नमो ॥२॥

नमो निषङ्गिण इषुधिमते

तस्कराणां पतये नमो ।

नमः सृकायिभ्यो जिघांसद्भ्यो

मुष्णतां पतये नमो ॥३॥

नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः

प्रकृन्तानां पतये नमो ।

नम उष्णीषिणे गिरिचराय

कुलुञ्चानां पतये नमो ॥४॥

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो ।

नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो ॥५॥

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो ।

नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो ॥६॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो ।

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो ॥७॥

नमः शयानेभ्य आसीनेभ्यश्च वो नमो ।
नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो ।।८।।
नमः सभाभ्यः सभापतिभ्यश्च वो नमो ।
नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो ।।९।।

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः
द्युम्नैर्वाजेभिरावृतम् ।।

(केवल फूल डालना)

१	२	३
ॐ शञ्चमे	मयश्चमे	प्रियश्चमे
अनुकामश्चमे	कामश्चमे	सौमनसश्चमे
भगश्चमे	द्रविणं चमे	भद्रंचमे
श्रेयश्चमे	वश्यश्चमे	यशश्चमे
यन्ताचमे	धर्ताचमे	क्षेमचमे
धृतिश्चमे	संविञ्चमे	ज्ञातंचमे
विश्वश्चमे	महश्चमे	सूश्चमे
प्रसूश्चमे	सीरंचमे	लयश्चम
ऋतञ्चमे	अमृतंचमे	अयक्ष्मंचमे
अनामयंचमे	जीवातुश्चमे	दीर्घायुत्वंचमे

अनमित्रं चमे अभयञ्चमे सुगंचमे

शयनंचमे सूषाचमे सुदिनंचमे

यज्ञेन कल्पताम् ।।

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो ।
नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो ।।१।।
नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो ।
नमो गणेभ्यो गणपतिभ्यश्च वो नमो ।।२।।
नमः कृत्स्नेभ्यः कृत्स्नपतिभ्यश्च वो नमो ।
नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो ।।३।।
नमः सेनाभ्यः सेनानीभ्यश्च वो नमो ।
नमो रथेभ्यो ऽरथिभ्यश्च वो नमो ।।४।।
नमो महद्भ्योऽर्भकेभ्यश्च वो नमो ।
नमो युवभ्य आशिनेभ्यश्च वो नमो ।।५।।
नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो ।
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो ।।६।।
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो ।
नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो ।।७।।

नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो ।
नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ।।८।।

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः
द्युम्नैर्वाजेभिरागतम् ।।

(केवल फूल डालना)

१	२	३
ऊर्क्चमे	सूनृताचमे	पयश्चमे
रसश्चमे	घृतं च मे	मधुचमे
सग्धिश्चमे	सपीतिश्चमे	कृषिश्चमे
वृष्टिश्चमे	जैत्रंचमे	औद्भिदंचमे
रयिश्चमे	रायश्चमे	पुष्टंचमे
पुष्टिश्चमे	विभुश्चमे	प्रभुश्चमे
पूर्णंचमे	पूर्णतरंचमे	कुयवंचमे
क्षितिचमे	अन्नंचमे	इक्षुश्चमे
व्रीहयश्चमे	यवाश्चमे	माषाश्चमे
तिलाश्चमे	नीवाराश्चमे	श्यामकाश्चमे
अणवश्चमे	प्रियङ्गवश्चमे	गोधूमाश्चमे
मसूराश्चमे	मुद्गाश्चमे	खल्वाश्चमे

यज्ञेन कल्पताम् ।।

नमो भवाय च रुद्राय च

नमः शर्वाय च पशुपतये च ।

नमो नीलग्रीवाय च शितिकण्ठाय च ॥१॥

नमो व्युप्तकेशाय च कपर्दिने च ।

नमः सहस्राक्षाय च शतधन्वने च ॥२॥

नमो गिरिशाय च शिपिविष्टाय च ।

नमो मीढुष्टमाय चेषुमते च ॥३॥

नमो ह्रस्वाय च वामनाय च ।

नमो बृहते च वर्षीयसे च ॥४॥

नमो वृद्धाय च संवृध्वने च ।

नमोऽग्र्याय च प्रथमाय च ॥५॥

नम आशवे चाजिराय च ।

नमः शीघ्र्याय च शीभ्याय च ॥६॥

नम ऊर्म्याय चावस्वन्याय च ।

नमो नादेयाय च द्वीप्याय च ॥७॥

अग्राविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरागतम् ॥

(केवल फूल डालना)

१	२
अश्मा चमे	मृत्तिका चमे
गिरयश्चमे	पर्वताश्चमे
सिकताश्चमे	वनस्पतयश्चमे
हिरण्यञ्चमे	अयश्चमे
सीसञ्चमे	त्रपुश्चमे
श्यामंचमे	लोहितायसंचमे
अग्निश्चम	आपश्चमे
वीरुधश्चम	ओषधयश्चमे
कृष्टपच्यञ्चमे	अकृष्टपच्यञ्चमे
ग्राम्याश्चमे	पशव आरण्याश्चमे
वित्तंचमे	वित्तिश्चमे
भूतंचमे	भूतिश्चमे
वसुचमे	वसतिश्चमे
कर्मचमे	शक्तिश्चमे
अर्थश्चम	एमश्चम
इत्याचमे	गतिश्चमे

यज्ञेन कल्पताम् ।।

नमो ज्येष्ठाय च कनिष्ठाय च ।

नमः पूर्वजाय चापरजाय च ॥१॥

नमो मध्यमाय चापगल्भाय च ।

नमो जघन्याय च बुध्न्याय च ॥२॥

नमः सोभ्याय च प्रतिसर्याय च ।

नमः आशुषेणाय चाशुरथाय च ॥३॥

नमो बिल्मिने च कवचिने च ।

नमो वर्मिणे च वरूथिने च ॥४॥

नमः शूराय चावभेदिने च ।

नमः श्रुताय च श्रुतसेनाय च ॥५॥

नमो याम्याय च क्षेम्याय च ।

नम उर्वर्याय च खल्याय च ॥६॥

नमः श्लोक्याय चावसान्याय च ।

नमः श्रवाय च प्रतिश्रवाय च ।

नमो वन्याय च कक्ष्याय च ॥७॥

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरागतम् ॥

(केवल फूल डालना)

१	२
अग्निश्चम इन्द्रश्चमे	सोमश्चम इन्द्रश्चमे
सविताचम इन्द्रश्चमे	सरस्वती चम इन्द्रश्चमे
पूषा चम इन्द्रश्चमे	बृहस्पतिश्चम इन्द्रश्चमे
मित्रश्चम इन्द्रश्चमे	वरुणश्चम इन्द्रश्चमे
धाताचम इन्द्रश्चमे	त्वष्टाचम इन्द्रश्चमे
मरुतश्चम इन्द्रश्चमे	विश्वेदेवाश्चम इन्द्रश्चमे
पृथिवीश्चम इन्द्रश्चमे	अन्तरिक्षं चम इन्द्रश्चमे
द्यौश्चम इन्द्रश्चमे	समाश्चम इन्द्रश्चमे
नक्षत्राणि चम इन्द्रश्चमे	दिशश्चम इन्द्रश्चमे ।।

यज्ञेन कल्पताम् ।।

नमो दुन्दुभ्यायचाऽहनन्याय च ।
नमो धृष्णवे च प्रमृशाय च ।।
नमो निषिङ्गिणे चेषुधिमते च ।
नमस्तीक्ष्णेषवे चायुधिने च ।
नमः सायुधायच सुधन्वनेच ।।
नमः सृत्याय च पथ्याय च ।
नमः काट्याय च नीप्याय च ।।

नमो नाद्याय च वैशन्ताय च ।

नमः कुल्याय च सरस्याय च ॥

नमः कूट्याय चावट्याय च ।

नमो वर्ष्याय चाऽवर्ष्याय च ॥

नमो मेघ्याय च विद्युत्याय च ।

नमो वीध्र्याय चातप्याय च ॥

नमो वात्याय च रेष्म्याय च ।

नमो वास्तव्याय च वास्तुपाय च ॥

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरागतम् ॥

(केवल फूल डालना)

१	२
अंशुश्च मे	रश्मिश्च मे
अदाभ्यश्च मे	अधिपतिश्च मे
उपांशुश्च मे	अन्तर्यामश्च मे
ऐन्द्रवायवश्च मे	मैत्रावरुणश्च मे
आश्विनश्च मे	प्रतिप्रस्थानश्च मे
शुक्रश्च मे	मन्थी च मे
आग्रायणश्च मे	क्षुल्लकवैश्वदेवश्च मे

ध्रुवश्चमे वैश्वानरश्चम
ऐन्द्राग्नश्चमे वैश्वदेवश्चमे
मरुत्वतीयश्चमे महेन्द्रीयश्चमे
सावित्रश्चमे सारस्वतश्चमे
पत्नीवतश्चमे हारियोजनश्चमे
स्रुचश्चमे चमसश्चमे ।।

यज्ञेन कल्पताम् ।।

नमः सोमाय च रुद्राय च ।
नमस्ताम्राय चारुणाय च ।
नमः शङ्गवे च पशुपतये च ।
नम उग्राय च भीमाय च ।
नमो हन्त्रे च हनीयसे च ।
नमोऽग्रेवधाय च दूरेवधाय च ।
नमो वृक्षेभ्यो हरिकेशेभ्यो । नमस्ताराय ।
नमः शम्भवे च मयोभवे च ।
नमः शङ्कराय च मयस्कराय च ।।
नमः शिवाय च शिवतराय च ।
नमः किंशल्याय च क्षयणाय च ।।
अग्राविष्णू सजोषसे इमा वर्धन्तु वां गिरः द्युम्नैर्वाजेभिरावृतम् ।।

१ २

इध्मांचमे वायव्यानिचमे

द्रोणकलशश्चमे पूतभृच्चमे

अपूतभृच्चमे ग्रावाणश्चमे

अधिषवणश्चमे अवभृथश्चमे

स्वगाकारश्चमे ॥

यज्ञेन कल्पताम् ॥

नम इरिण्याय च प्रपथ्याय च ।

नमः पुलस्तिने च कपर्दिने च ॥

नमो गोष्ठ्याय च गृह्याय च ।

नमस्तल्प्याय च गेह्याय च ॥

नमः पार्याय चावार्याय च ।

नमः प्रतरणाय चोत्तरणाय च ॥

नमस्तीर्थ्याय च कूल्याय च ।

नमः फेन्याय च शिष्प्याय च ॥

नमः सिकत्याय च प्रवाह्याय च ।

नमो ह्रदय्याय च निवेष्प्याय च ॥

नमः काट्याय च गह्वरेष्ठाय च ।

नमः शुष्क्याय च हरित्याय च ॥

नमो लोप्याय चोलप्याय च ।

नमः पांसव्याय च रजस्याय च ।।

नमः सूर्म्याय चोर्म्याय च ।

नमः पर्ण्याय च पर्णशादाय च ।।

नम आखिदते च प्रखिदते च ।

नमोऽभिघ्नते चापगुरमानाय च ।।

नमः आखिदाय च विखिदाय च ।।

नमो वः किरिकेभ्यो देवानां हृदयेभ्यो ।

नमो विचिनुत्केभ्यो

नमो विक्षीणकेभ्यो

नम आनिर्हतेभ्यः ।।

अग्राविष्णू सजोषसे इमा वर्धन्तु वां गिरः

द्युम्नैर्वाजेभिरावृतम् ।।

(केवल फूल डालना)

१	२
अग्निश्चमे	घर्मश्चमे
अर्कश्चमे	सूर्यश्चमे
प्राणश्चमे	अश्वमेधश्चमे
पृथिवीचमे	दितिश्चमे

अदितिश्च मे द्यौश्च मे
व्रतं चर्तुश्च संवत्सरश्च तपश्चाहोरात्रे
ऊर्वष्ठीवे बृहद्रथन्तरश्च मे
शक्वरीरङ्गुल्यो दिशश्च मे ।।
यज्ञेन कल्पताम् ।।

द्रापे अन्धसस्पते दरिद्र नीललोहित
आसां प्रजानामेषां पुरुषाणामेषां
पशूनां माभेर्मा रुङ्मा नः किञ्चनाऽममत्
इमा रुद्राय तवसे कपर्दिने
क्षयद्वीराय प्रभरामहे मतीः ।
यथा नः शमसद्द्विपदे चतुष्पदे
विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ।
या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजीः
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ।
परि णो रुद्रस्य हेतिर्वृणक्तु
परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृड ।
मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमेवृक्ष आयुधन्निधाय
कृत्तिं वसान उच्चर पिनाकम् ।
विभ्रदुच्चर विकिरिड विलोहित
नमस्ते अस्तु भगवः ।
यास्ते सहस्रं हेतयोऽन्येऽस्मन्निव पान्तु ताः ।।

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः
द्युम्नैर्वाजेभिरावृतम् ।।

१	२
गर्भाचमे	वत्साचमे
त्र्यविश्चमे	त्र्यवी चमे
दित्यवाट् चमे	दित्यौहीचमे
पञ्चाविश्चमे	पञ्चावीचमे
त्रिवत्साश्चमे	त्रिवत्सश्चमे
तुर्यवाट्चमे	तुर्यौहीचमे
पष्टवाट्चमे	पष्टौहीचम
उक्षाचमे	वशाचमे
अनड्वांश्चमे	धेनुश्चम
ऋषभश्चमे	वेहश्चमे ।।

यज्ञेन कल्पताम् ।।

सहस्रधा सहस्राणि हेतयस्तव बाह्वोः ।
तासामीशानो भगवः पराचीना मुखाकुरु ।।
असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।१।।
येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।२।।
ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।३।।
ये नीलग्रीवाः शितिकण्ठा शर्वा अधः क्षमाचराः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।४।।
ये वनेषु शिष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।५।।
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।६।।
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।७।।
ये पथीनां पथि रक्षय ऐह मृदाय व्युधः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।८।।

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।९।।
य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितिष्ठरे।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ।।१०।।
ॐ नमो अस्तु रुद्रेभ्यो - ये दिवि - येषां
वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा-
स्तेभ्यो नमो अस्तु ते नो मृडयन्तु
ते यं द्विष्मो यश्चनो द्वेष्टि
तमेषां जम्भे दधामि ।।१।।
ॐ नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां
वातमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा-
स्तेभ्यो नमो अस्तु ते नो मृडयन्तु
ते यं द्विष्मो यश्च नो द्वेष्टि
तमेषां जम्भे दधामि ।।२।।

ॐ नमो अस्तु रुद्रेभ्यो ये पृथिव्यां
येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा-
स्तेभ्यो नमो अस्तु ते नो मृडयन्तु
ते यं द्विष्मो यश्च नो द्वेष्टि
तमेषां जम्भे दधामि ॥३॥

अग्नाविष्णू सजोषसे इमा वर्धन्तु वां गिरः
...... द्युम्नैर्वाजेभिरागतम् ॥

१	२
एका च मे	तिस्रश्च मे
तिस्रश्च मे	त्रयस्त्रिंशच्च मे
चतस्रश्च मे	अष्टौ च मे
अष्ट च मे	अष्टाचत्वारिंशच्च मे
वाजश्च	प्रसवश्चापिजश्च
क्रतुश्च	स्वपतिश्च वसुश्च

स्वर्श्वो मूर्धा वैयशनो व्यश्नियान्त्य आन्त्योऽन्त्यो
भौवनो भुवनस्य पतिः प्रजापतिरधिपतिरियन्ते
राण्मित्रो यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा

प्रजानां त्वाऽधिपत्याय आयुर्यज्ञेन कल्पताम् ।।
मनो यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां
चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां
वाग्यज्ञेन कल्पतामाऽऽत्मा यज्ञेन कल्पतां
ब्रह्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां
यज्ञो यज्ञेन कल्पताम् ।।
ऋक्च सामश्च स्तोमश्च
यजुश्च बृहद्रथन्तरश्च स्वर्देवा अगन्म प्रजापतेः
प्रजा अभूवन्नऽमृता अभूम वेट्स्वाहा ।।

"वाजस्य नु प्रसवा इति षट् "।।

(नोटः- यहां "संग्रहस्तोत्र" या "जयस्तोत्र" यथासंभव पढ़ें फिर पृष्ठ ९७ पर "विश्वे अद्य मरुतो...." पढ़ें।)

अथ संग्रहस्तोत्रम् ॥

संग्रहेण सुखदुःखलक्षणं
मां प्रति स्थितमिदं शृणु प्रभो ।
सौख्यमेष भवता समागमः
स्वामिना विरह एव दुःखिता ॥१॥

अन्तरप्यतितरामणीयसी
या त्वदप्रथनकालिकास्ति मे ।
तामपीश परिमृज्य सर्वतः
स्वं स्वरूपममलं प्रकाशय ॥२॥

तावके वपुषि विश्वनिर्भरे
चित्सुधारसमये निरत्यये ।
तिष्ठतः सततमर्चतः प्रभुं
जीवितं मृतमथान्यदस्तु मे ॥३॥

ईश्वरोऽहमहमेव रूपवान्
पण्डितोऽस्मि सुभगोऽस्मि कोऽपरः ।
मत्समोऽस्ति जगतीति शोभते
मानिता त्वदनुरागिणः परम् ॥४॥

देवदेव भवदद्वयामृता-
ख्यातिसंहरणलब्धजन्मना ।
तद्यथास्थितपदार्थसंविदा
मां कुरुष्व चरणार्चनोचितम् ।।५।।

ध्यायते तदनु दृश्यते ततः
स्पृश्यते च परमेश्वरः स्वयम् ।
यत्र पूजनमहोत्सवः स मे
सर्वदास्तु भवतोऽनुभावतः ।।६।।

यद्यथास्थितपदार्थदर्शनं
युष्मदर्चनमहोत्सवश्च यः
युग्ममेतदितरेतराश्रयं
भक्तिशालिषु सदा विजृम्भते ।।७।।

तत्तदिन्द्रियमुखेन सन्ततं
युष्मदर्चनरसायनासवम् ।
सर्वभावचषकेषु पूरिते-
ष्वापिबन्नपि भवेयमुन्मदः ।।८।।

अन्यवेद्यमणुमात्रमस्ति न
स्वप्रकाशमखिलं विजृम्भते ।
यत्र नाथ भवतः पुरे स्थितिं
तत्र मे कुरु सदा तवार्चितुः ॥९॥

दासधाम्नि विनियोजितोऽप्यहं
स्वेच्छयैव परमेश्वर त्वया ।
दर्शनेन न किमस्मि पात्रितः
पादसंवहनकर्मणापि वा ॥१०॥

शक्तिपातसमये विचारणं
प्राप्तमीश न करोषि कर्हिचित् ।
अद्य मां प्रति किमागतं यतः
स्वप्रकाशनविधौ विलम्बसे ॥११॥

तत्र तत्र विषये बहिर्विभा-
त्यन्तरे च परमेश्वरीयुतम् ।
त्वां जगत्त्रितयनिर्भरं सदा
लोकयेय निजपाणिपूजितम् ॥१२॥

स्वामिसौधमभिसन्धिमात्रतो
निर्विबन्धमधिरुह्य सर्वदा ।
स्यां प्रसादपरमामृतासवा-
पानकेलिपरिलब्धनिर्वृतिः ।।१३।।

यत्समस्तसुभगार्थवस्तुषु
स्पर्शमात्रविधिना चमत्कृतिम् ।
तां समर्पयति तेन ते वपुः
पूजयन्त्यचलभक्तिशालिनः ।।१४।।

स्फारयस्यखिलमात्मना स्फुरन्
विश्वमामृशसि रूपमामृशन् ।
यत्स्वयं निजरसेन घूर्णसे
तत्समुल्लसति भावमण्डलम् ।।१५।।

योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः ।
स्वात्मपक्षपरिपूरिते जग-
त्यस्य नित्यसुखिनः कुतो भयम् ।।१६।।

कण्ठकोणविनिविष्टमीश ते

कालकूटमपि मे महामृतम् ।

अप्युपात्तममृतं भवद्वपु-

र्भेदवृत्ति यदि रोचते न मे ॥१७॥

त्वत्प्रलापमयरक्तगीतिका-

नित्ययुक्तवदनोपशोभितः ।

स्यामथापि भवदर्चनक्रिया-

प्रेयसीपरिगताशयः सदा ॥१८॥

ईहितं न बत पारमेश्वरं

शक्यते गणयितुं तथा च मे ।

दत्तमप्यमृतनिर्भरं वपुः

स्वं न पातुमनुमन्यते तथा ॥१९॥

त्वामगाधमविकल्पमद्वयं

स्वं स्वरूपमखिलार्थघस्मरम् ।

आविशन्नहमुमेश सर्वदा

पूजयेयमभिसंस्तुवीय च ॥२०॥

इति श्रीमदुत्पलदेवविरचितं संग्रहस्तोत्रम् ॥

अथ जयस्तोत्रम्।

ॐ जयलक्ष्मीनिधानस्य निजस्य स्वामिनः पुरः ।
जयोद्घोषणपीयूषरसमास्वादये क्षणम् ।।१।।
जयैकरुद्रैकशिव महादेव महेश्वर ।
पार्वतीप्रणयिञ्शर्व सर्वगीर्वाणपूर्वज ।।२।।
जय त्रैलोक्यनाथैकलाञ्छनालिकलोचन ।
जय पीतार्तलोकार्तिकालकूटाङ्ककन्धर ।।३।।
जय मूर्तत्रिशक्त्यात्मसितशूलोल्लसत्कर ।
जयेच्छामात्रसिद्धार्थपूजार्हचरणाम्बुज ।।४।।
जय शोभाशतस्यन्दिलोकोत्तरवपुर्धर ।
जयैकजटिकाक्षीणगङ्गाकृत्यात्तभस्मक ।।५।।
जय क्षीरोदपर्यस्तज्योत्स्नाच्छायानुलेपन ।
जयेश्वराङ्गसङ्गोत्थरत्नकान्ताहिमण्डन ।।६।।
जयाक्षयैकशीतांशुकलासदृशसंश्रय ।
जय गङ्गासदारब्धविश्वैश्वर्याभिषेचन ।।७।।
जयाधराङ्गसंस्पर्शपावनीकृतगोकुल ।
जय भक्तिमदाबद्धगोष्ठीनियतसन्निधे ।।८।।

जय स्वेच्छातपोवेशविप्रलम्भितबालिश ।

जय गौरीपरिष्वङ्गयोग्यसौभाग्यभाजन ॥९॥

जय भक्तिरसार्द्रार्द्रभावोपायनलम्पट ।

जय भक्तिमदोद्दामभक्तवाङ्नृत्ततोषित ॥१०॥

जय ब्रह्मादिदेवेशप्रभावप्रभवाव्यय ।

जयलोकेश्वरश्रेणीशिरोविधृतशासन ॥११॥

जय सर्वजगन्न्यस्तस्वमुद्राव्यक्तवैभव ।

जयात्मदानपर्यन्तविश्वेश्वर महेश्वर ॥१२॥

जय त्रैलोक्यसर्गेच्छावसरासद्द्वितीयक ।

जयैश्वर्यभरोद्वाहदेवीमात्रसहायक ॥१३॥

जयाक्रमसमाक्रान्तसमस्तभुवनत्रय ।

जयाविगीतमाबालगीयमानेश्वरध्वने ॥१४॥

जयानुकम्पादिगुणानपेक्षसहजोन्नते ।

जय भीममहामृत्युवदनापूर्वभैरव ॥१५॥

जयविश्वक्षयोद्दण्डक्रियानिश्चारिपाचिक ।

जय श्रेयःशतगुणानुगनामानुकीर्तन ॥१६॥

जय हेलावितीर्णैतदमृताकरसागर ।

जय विश्वक्षयाक्षेपिक्षणकोपाशुशुक्षणे ॥१७॥

जय मोहान्धकारान्धजीवलोकैकदीपक ।
जय प्रसुप्तजगतीजागरूकाधिपूरुष ।।१८।।
जय देहाद्रिकुञ्जान्तर्निकूजञ्जीवजीवक ।
जय सन्मानसव्योमविलासिवरसारस ।।१९।।
जय जाम्बूनदोदग्रधातूद्भवगिरीश्वर ।
जय पापिषु निन्दोल्कापातनोत्पातचन्द्रमः ।।२०।।
जय कष्टतपःक्लिष्टमुनिदेवदुरासद ।
जय सर्वदशारूढभक्तिमल्लोकलोकित ।।२१।।
जय स्वसम्पत्प्रसरपात्रीकृतनिजाश्रित ।
जय प्रपन्नजनतालालनैकप्रयोजन ।।२२।।
जय सर्गस्थितिध्वंसकारणैकावदानक ।
जय भक्तिमदालोलल्लीलोत्पलसोत्सव ।।२३।।
जय जयभाजन जय जितजन्म-
जरामरण जय जगज्ज्येष्ठ ।
जय जय जय जय जय जय जय
जय जय जय जय जय जय त्र्यक्ष ।।२४।।

***

ॐ विश्वे अद्य मरुतो विश्व ऊती-

विश्वे भवन्त्वग्नयः समिद्धाः ।

विश्वे मा देवा अवसा गमन्तिह

विश्वमस्तु द्रविणं वाजे अस्मिन् ।।

आ मा वाजस्य प्रसवो जगम्या-

दाऽमा द्यावापृथिवी विश्वरूपे ।

आ मा गन्तां पितरा मातरा चामा

सोमो अमृतत्वेन गम्यात् ।।

वाजस्य नु प्रसवे मातरं मही-

मदितिं नाम वचसा करामहे ।

यस्यामिदं विश्वं भुवनमाविवेश

तस्यां नो देवः सविता धर्मसाविषत् ।।

वाजो मा सप्त प्रदिशश्चतस्रो वा परावतः ।

वाजो मा विश्वैर्देवैर्धनसाता इहावतु

वाजो मे अद्य प्रसुवाति दानं

वाजो देवान्हविषा वर्धयाति

वाजस्य हि प्रसवेनानमीति विश्वा

आशा वाजपतिर्भवेयम् ।

वाजः पुरस्तादुत मध्यतो नो
वाजो देवानृतुभिः कल्पयाति ।
वाजस्य हि प्रसवेनान्नमेति
सर्वा आशा वाजपतिर्भवेयम् ।।
सं मा सृजामि पयसः पृथिव्याः
सं मा सृजाम्यद्भिरौषधीभिः
सोऽहं वाजस्य नौम्यग्रेः ।।

"तेजोसि।।"

पयः पृथिव्यां पय ओषधीषु
पयो दिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

६

तर्पणम् ॥

मद्यं पीत्वा गुरुदारांश्च गत्वा
स्तेयं कृत्वा ब्रह्महत्यां विधाय ।
भस्मच्छन्नो भस्मशय्यां शयानो
रुद्राध्यायी मुच्यते सर्वपापैः ॥
नित्यं दण्डी नित्ययज्ञोपवीती
नित्यं ध्याता भस्मना कर्मबन्धी ।
रुद्रं दृष्ट्वा देवमीशानमुग्रं
यातिस्थानं तेन साकं तदीयम् ॥

अनेन रुद्रमन्त्रसहित चमकानुवाक
पाठेन/स्नानेन/होमेन/पुष्पार्चनेन
आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं
सद्गुरुप्रसादप्राप्त्यर्थं भगवान् भवो देवः शर्वो देवः
रुद्रो देवः पशुपतिः देवः उग्रो देवः भीमो देवः
महादेवः ईशान देवः शतरुद्रेश्वरः महामृत्युञ्जय-
भट्टारकः पार्वतीसहितः परमेश्वरः
श्रीअमृतेश्वरभैरवः प्रीयतां प्रीतोऽस्तु ॥

(विस्तीर्णतर्पणम् ।।)

नमस्ते रुद्र इत्येतत्सर्वोपद्रवनाशनम् ।
सर्वशान्तिकरं प्रोक्तं महापातकनाशनम् ।।
रक्षोघ्नं च यशस्यं च लक्ष्म्यायुःपुष्टिवर्धनम् ।
अध्यवोचदित्यनेन रक्षा स्याद्व्याधितस्य च ।।
सिद्धार्थकानां क्षेपेण पथि चैतत्सदा पठेत् ।
क्षेमेण स्वगृहानेति सर्वबाधाविवर्जितः ।।
असौ यस्ताम्र इत्येतत्पठेन्नित्यं दिवाकरम् ।
उपतिष्ठेत धर्मज्ञः सायं प्रातरतन्द्रितः ।।
अन्नमक्षयमाप्नोति दीर्घमायुश्च विन्दति ।
प्रमुञ्च धनुरित्येतत्षड्भिरायुधमन्त्रणम् ।।
रिपूणां भङ्गदं युद्धे नात्र कार्या विचारणा ।
मा नो महन्त इत्येतद्बालानां शान्तिकारणम् ।।
नमो हिरण्यबाहवेऽनुवाकैः षड्भिरेव च ।
राजिकांस्तिलतैलाक्तांञ्जुहुयाच्छत्रुनाशनम् ।।
नमो वः किरिकेभ्यश्च हुत्वा पद्मलक्षं नरः ।
राज्यलक्ष्मीमवाप्नोति नात्र कार्याविचारणा ।।
बिल्वानां लक्षहोमेन कनकं बहु विन्दति ।
इमा रुद्रायेति तिलैः कृत्वा होमं विचक्षणः ।।

शीघ्रमेव महाभाग धनमाप्नोत्यचिन्तितम् ।
अनेनैव च मन्त्रेण दूर्वाहोमेन मानवः ॥
सर्वव्याधिविनिर्मुक्तो भयान्सर्वान्व्यपोहति ।
जटारोहेण चेध्मानां या ते रुद्र शिवा तनूः ॥
हुत्वाऽयुतं च धर्मज्ञः पुत्रं प्राप्नोत्यभीप्सितम् ।
असङ्ख्याताः सहस्राणि मन्त्रैः स्यादाभिचारिकम् ॥
नमोऽस्तु रुद्रेभ्य इति प्रोक्ता प्रत्यङ्गिरा परा ।
पाठमात्रं पठेन्नित्यं रुद्राध्यायस्य मानवः ॥
सर्वदुःखविनिर्मुक्तः सर्वसम्पत्समन्वितः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥
इह लोके तथा चान्ते रुद्रलोकं स गच्छति ॥

अनेन मन्त्रपाठेनात्मनोवाङ्मनःकायोपार्जित-
पापनिवारणार्थं सद्गुरुप्रसादप्राप्त्यर्थं
भगवान् भवो देवः शर्वो देवः रुद्रो देवः
पशुपतिः देवः उग्रो देवः भीमो देवः महादेवः
ईशानो देवः शतरुद्रेश्वरः महामृत्युञ्जयमहाकालः
पार्वतीसहितः परमेश्वरः श्रीअमृतेश्वरभैरवः
प्रीयतां प्रीतोऽस्तु ॥

इति रुद्रमन्त्र चमकानुवाकम् ॥

करोतु सा नः शुभहेतुरीश्वरी-
शुभानि भद्राण्यभिहन्तु चापदः ।।१०।।

अथ पञ्चस्तव्यामम्बस्तवश्चतुर्थः ।

यामाऽऽमनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।
तामऽर्धपल्लवितशङ्कररूपमुद्रां
देवीमऽनन्यशरणः शरणं प्रपद्ये ।।१।।

अम्ब! स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्बस्य मे स्तुतिरसावऽसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोति ।।२।।

व्योमेति बिन्दुरिति नाद इतीन्दुलेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निःष्यन्दमानसुखबोधसुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ।।३।।

आविर्भवत्पुलकसन्ततिभिः शरीरै-
र्निःष्यन्दमानसलिलैर्नयनैश्च नित्यम् ।
वाग्भिश्च गद्गदपदाभिरुपासते ये
पादौ तवाम्ब! हृदयेषु त एव धन्याः ।।४।।

वक्त्रं यदुद्यतमऽभिष्टुतये भवत्या-
स्तुभ्यं नमो यदपि देवि! शिरः करोति ।
चेतश्च यत्त्वयि परायणमम्ब! तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥५॥

मूलालवालकुहरादुदिता भवानि!
निर्भिद्य षट्सरसिजानि तडिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निःष्यन्दमानपरमामृततोयरूपा ॥६॥

दग्धं यदा मदनमेकमऽनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयांचकार ।
धत्ते तदाप्रभृति देवि! ललाटनेत्रं
सत्यं ह्रियैव मुकुलीकृतमिन्दुमौलिः ॥७॥

अज्ञातसम्भवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये ॥८॥

चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।

वेतालसंहतिपरिग्रहता च शम्भोः
शोभां बिभर्ति गिरिजे! तव साहचर्यात् ।।९।।

कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मात-
र्लास्यात्मना परिणमन्ति जगद्विभूत्यै ।।१०।।

जन्तोरपश्चिमतनोः सति कर्मसाम्ये
निःशेषपाशपटलच्छिदुरा निमेषात् ।
कल्याणि! दैशिककटाक्षसमाश्रयेण
कारुण्यतो भवसि शाम्भववेददीक्षा ।।११।।

मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
एकः स एव भुवनत्रयसुन्दरीणां
कन्दर्पतां व्रजति पञ्चशरीं विनापि ।।१२।।

ये भावयन्त्यमृतवाहिभिरंशुजालै-
राप्यायमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिः सुरवरैरपि कालकक्ष्याम् ।।१३।।

यः स्फटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
मातः स विश्वकवितार्किकचक्रवर्ती ॥१४॥

बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥१५॥

अर्धेन किं नवलताललितेन मुग्धे!
क्रीतं विभोः परुषमर्धमिदं त्वयेति ।
आलीजनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि! जडीभवन्ति ॥१६॥

ब्रह्माण्ड बुद्बुदकदम्बकसंकुलोऽयं
मायोदधिर्विविधदुःखतरङ्गमालः ।
आश्चर्यमम्ब! झटिति प्रलयं प्रयाति
त्वद्ध्यानसन्ततिमहाबडवामुखाग्नौ ॥१७॥

दाक्षायणीति कुटिलेति गुहारणीति
कात्यायनीति कमलेति कलावतीति ।

एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ।।१८।।
आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ।।१९।।
त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निःसारमेव निखिलं त्वदृते यदि स्यात्।।२०।।
ज्योतींषि यद्दिवि चरन्तियदन्तरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब! तव केवलमाज्ञयैव ।।२१।।
सङ्कोचमिच्छसि यदा गिरिजे! तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनाः सुकरीभवन्ति ।।२२।।

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रूकिङ्करीकृतसरोजगृहासहस्राः ।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥२३॥

हन्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनीकिरणसंहतिरेव शक्ता
घर्मं निजं शमयितुं निजयैव वृष्ट्या ॥२४॥

शक्तिः शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥२५॥

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीतशान्तिः ।
व्योमीति याः किलकलाः कलयन्ति विश्वं
तासां विदूरतरमम्ब ! पदं त्वदीयम् ॥२६॥

यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।

तावद्विकल्पजटिलाः कुटिलप्रकारा-
स्तर्कग्रहाः समयिनां प्रलयं न यान्ति ।।२७।।
यद्देवयानपितृयानविहारमेके
कृत्वा मनः करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ।।२८।।
स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सासि स्तुता किल मयेति तितिक्षितव्यम् ।।२९
कालाग्निकोटिरुचिमम्ब षडऽध्वशुद्धा-
वाप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां सकलीकृतौ च
ध्यायन्त एव जगतां गुरवो भवन्ति ।।३०।।
विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनाम
साक्षादपारकरुणां गुरुमूर्तिमेव ।।३१।।

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः
सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥३२॥

इति श्रीपञ्चस्तव्यां चतुर्थोऽम्बास्तवः ॥

***

करोतु सा नः शुभहेतुरीश्वरी-
शुभानि भद्राण्यभिहन्तु चापदः ॥१०॥

***

तव च काचन न स्तुतिरम्बिके
सकलशब्दमयी किल ते तनुः ।
निखिलमूर्तिषु मे भवदन्वयो
मनसिजासु बहिःप्रसरासु च ॥
इति विचिन्त्य शिवे! शमिताशिवे!
जगति जातमयत्नवशादिदम्
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलापि मे ॥

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तः समयिनः ।
जगन्मातर्जन्मज्वरभयतमः कौमुदि! वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ।।१।।
ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन्व्याधीञ्छमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखंदलयति पिनष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते।।२।।
मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौमग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेदत्र क्वचन तव मातः करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ।।३।।
पिता माता भ्राता सुहृदऽनुचरः सद्म गृहिणी
वपुः पुत्रो मित्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्नेमातर्भव करुणया सन्निधिकरी ।।४।।
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।

अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक् तत्वं त्वत्तो भगवति न वीक्षामह इमे ।।५।।

असंख्यैः प्राचीनैर्जननि जननैः कर्मविलया-
द्गते जन्मन्यन्ते गुरुवपुरमासाद्य गिरिशम् ।
अवाप्याज्ञां शैवीं क्रमतनुरपि त्वां विदितवा-
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ।।६।।

त्वदन्यः पाणिभ्यामभयवरदो दैवतगण-
स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया ।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ।।७।।

सुधासिन्धोर्मध्ये सुरविटपिवाटी परिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ।।८।।

***

आश्रान्वितम् । अति आश्रान्वितम् ।
बहकृतम् । अतिबहकृतम् ।।०।।

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-
मम्ब त्वामनुसन्दधामि भगवद्गीते! भवद्वेषिणीम्।।१।।

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः।।२।।

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः।।३।।

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।४।।

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।५।।

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ।

अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवैः रणनदी कैवर्तके केशवे ।।६।।

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथा सम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमल प्रध्वंसि नः श्रेयसे ।।७।।

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ।।८।।

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ।।९।।

***

अथ

अष्टमोऽध्यायः

अर्जुन उवाच

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ।।१।।
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः।।

श्रीभगवानुवाच

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ।।३।।
अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ।।४।।
अन्तकालेऽपि मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ।।
यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ।।६।।
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मर्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ।।७।।

अभ्यासयोगयुक्तेन चेतसानन्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८॥

कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥९॥

प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेणाभिधास्ये ॥११॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥१३॥

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ।।१४।।
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ।।१५।।
आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।।१६।।
सहस्त्रयुगपर्यन्तमहर्यं ब्रह्मणो विदुः ।
रात्रिं युगसहस्त्रान्तां तेऽहोरात्रविदो जनाः ।।१७।।
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ।।१८।।
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ।।१९।।
परस्तस्मात्तु भावोऽन्यो व्यक्ताव्यक्तः सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।।२०।।
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।।२१।।
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यं प्राप्य न पुनर्जन्म लभन्ते योगिनोऽर्जुन।।२२।।

यस्यान्तःस्थानि भूतानि यत्र सर्वं प्रतिष्ठितम् ।

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।

प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।

तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।

तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥२५॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।

अनयोर्यात्यनावृत्तिमाद्ययावर्ततेऽन्यया ॥२६॥

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।

तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥

वेदेषु यज्ञेषु तपःसु चैव

दानेषु यत्पुण्यफलं प्रदिष्टम् ।

अत्येति तत्सर्वमिदं विदित्वा

योगी परं स्थानमुपैति चाद्यम् ॥२८॥

इति श्रीमहामाहेश्वराचार्यवर्यराजानकाभिनवगुप्तपाद-
विरचिते श्रीमद्भगवद्गीतार्थसंग्रहेऽष्टमोऽध्यायः ॥

अथ

नवमोऽध्यायः

श्रीभगवानुवाच

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।।१।।
राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ।।२।।
अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ।।३।।
मया ततमिदं कृत्स्नं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।।४।।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।।५।।
यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ।।६।।
एवं हि सर्वभावेषु चराम्यनभिलक्षितः ।
भूतप्रकृतिमास्थाय सहैव च विनैव च ।।७।।

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ।।८।।
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ।।९।।
न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ।।१०।।
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ।।११।।
अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् । १२।।
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
आसुरीं राक्षसीं चैव प्रकृतिं मोहनीं श्रिताः।।१३।।
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ।।१४।।
सततं कीर्तयन्तश्च यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।१५।।
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ।।१६।।

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ।।१७।।
पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ।।१८।।
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ।।१९।।
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ।।२०।।
त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान् ।।२१।।
ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ।।२२।।
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।२३।।

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।

तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥२४॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।

न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२५॥

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।

भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥२६॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२७॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥२८॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।

संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२९॥

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥३०॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।

साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३१॥

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।

कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३२॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।।
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।।३४।।
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।।३५।।

इति श्रीमहामाहेश्वराचार्यवर्यराजानकाभिनवगुप्तपाद-
विरचिते श्रीमद्भगवद्गीतार्थसंग्रहे नवमोऽध्यायः।।

अथ

दशमोऽध्यायः ।।

श्रीभगवानुवाच

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ।।१।।

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ।।२।।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ।।३।।

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो भावो भयं चाभयमेव च ।।४।।

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ।।५।।

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ।।६।।

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ।।७।।

अयं सर्वस्य प्रभव इतः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ।।८।।
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति रमयन्ति च ।।९।।
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मां प्राप्यन्ति ते।।१०।।
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।।११।।

अर्जुन उवाच

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ।।१२।।
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ।।
सर्वमेतदृतं मन्ये यन्मे वदसि केशव ।
नहि ते भगवन्व्यक्तिं विदुर्देवा महर्षयः ।।१४।।
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ।।१५।।
वक्तुमर्हस्यशेषेण विभूतीरात्मनः शुभाः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि।।१६।।

कथं विद्यां महायोगिंस्त्वामहं परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ।।१७।।

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ।।१८।।

श्रीभगवानुवाच

हन्त ते कथयिष्यामि विभूतीरात्मनः शुभाः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।।१९।।

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ।।२०।।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ।।२१।।

वेदानां सामवेदोऽहं देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ।।२२।।

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ।।२३।।

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ।।२४।।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ।।२५।।

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ।।२६।।
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ।।२७।।
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ।।२८।।
अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ।।२९।।
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ।।३०।।
पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ।।३१।।
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ।।३२।।
अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ।।३३।।
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा ।।३४।।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥३५॥
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥३६॥
वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥
दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥
यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥३९॥
नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥४१॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन जगत्स्थितः ॥४२॥

इति श्रीमहामाहेश्वराचार्यवर्यराजानकाभिनवगुप्तपाद-
विरचिते श्रीमद्भगवद्गीतार्थसंग्रहे दशमोऽध्यायः ॥

अथ

पञ्चदशोऽध्यायः

श्रीभगवानुवाच

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।।१।।

अधश्चोर्ध्वं प्रसृता यस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ।।२।।

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण शितेन छित्त्वा ।।३।।

ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये-
द्यतः प्रवृत्तिः प्रसृता पुराणी ।।४।।

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥६॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥

तिष्ठन्मुत्क्रामन्तं वा भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ।।१३।।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।१४।।
सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।।१५।।
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।१६।।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।१७।।
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।१८।।
यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ।।१९।।
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृत्यश्च भारत ।।२०।।

इति श्रीमहामाहेश्वराचार्यवर्यराजानकाभिनवगुप्तपाद-
विरचिते श्रीमद्भगवद्गीतार्थसंग्रहे पञ्चदशोऽध्यायः ।।

श्रीगुरुस्तुति से चुने गये पद्यपुष्पोंका
गुरुदेव स्वामीजी महाराज को समर्पण।

***

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुःसाक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योग पीठस्थं धर्मकामार्थ सिद्धये ॥

श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम् ।
यस्य सन्निध्यमात्रेण चिदानन्दायते परम् ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम् ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
शास्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपाः ॥

यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
उभयोरन्तरं नास्ति गुरोरपि शिवस्य च ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

घोर संसारकान्तार समुत्तारैकहेतवे ।
नमस्ते चित्स्वरूपाय शिवाय गुरवे नमः ।।
यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ।
स एव सर्वसंपत्तिस्तस्मै श्रीगुरवे नमः ।।
नमस्ते गुरवे तस्मै इष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ।।

विनाशिताशेषविकल्पबुद्ध्य-
हंरूपमन्त्रार्थविकासिकाभ्याम् ।
देहाद्यहंकारनिवर्तिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।
उद्घाटिताद्वैतमहेक्षणाभ्यां
निमीलितद्वैतविलोचनाभ्याम् ।
मोहान्धकारेऽपि विरोचनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।
उदीर्णरागप्रतिरोधिकाभ्यां
विलीनबोधप्रतिबोधिकाभ्याम् ।
अनादिमायामलदारिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।
अम्बादिरौद्रयन्तमरीचिकाभ्यां
वर्णादिसर्वाध्वविवर्त्तिकाभ्याम् ।

इच्छादिदेवीततचन्द्रिकाभ्यां

नमो नमः श्रीगुरुपादुकाभ्याम् ॥

संसारदावानलघोरताप-

शान्त्यर्थपीयूषमहाह्रदाभ्याम् ।

आप्यायितश्रर्तृ जनव्रजाभ्यां

नमो नमः श्रीगुरुपादुकाभ्याम् ॥

समस्तविद्योदधिशारदाभ्यां

श्रीशारिकास्वान्तसुसेविताभ्याम् ।

सच्छिष्यवृन्दैः परिपूजिताभ्यां

नमो नमः श्रीगुरुपादुकाभ्याम् ॥

ग्रन्थप्रकाशार्थधृतव्रताभ्यां

तिरस्कृतानादिमनस्तमोभ्याम् ।

मुक्तिप्रदाभ्यां विभवप्रदाभ्यां

नमो नमः श्रीगुरुपादुकाभ्याम् ॥

दौर्भाग्यदावाग्निशिवाम्बुदाभ्यां

दूरीकृताशेषविपत्तिभ्याम् ।

कृपाकृतार्थीकृतमाहस्याभ्यां

नमो नमः श्रीगुरुपादुकाभ्याम् ॥

***

व्याप्तचराचरभावविशेषं
चिन्मयमेकमनन्तमनादिम् ।
भैरवनाथमनाथशरण्यं
त्वन्मयचित्ततया हृदि वंदे ।।१।।

त्वन्मयमेतदशेषमिदानीं
भाति मम त्वदनुग्रहशक्त्या
त्वं च महेश! सदैव ममात्मा
स्वात्ममयं मम तेन समस्तम् ।।२।।

स्वात्मनि विश्वगते त्वयि नाथे
तेन न संसृतिभीतिः कथाऽस्ति ।
सत्स्वपि दुर्धरदुःखविमोह-
त्रासविधायिषु कर्मगणेषु ।।३।।

अन्तक! मां प्रति मा दृशमेनां
क्रोधकरालतमां विदधीहि ।
शङ्करसेवनचिन्तनधीरो
भीषणभैरवशक्तिमयोऽस्मि ।।४।।

इत्थमुपोढभवन्मयसंविद्-
दीधितिदारितभूरितमिस्रः ।

मृत्युर्यमान्तककर्मपिशाचै-
र्नाथ! नमोऽस्तु न जातु बिभेमि ॥५॥

प्रोदितसत्यविबोधमरीचि-
प्रेक्षितविश्वपदार्थसतत्त्वः ।
भावपरामृतनिर्भरपूर्णे
त्वय्यहमात्मनि निर्वृतिमेमि ॥६॥

मानसगोचरमेति यदैव
क्लेशदशातनुतापविधात्री ।
नाथ! तदैव मम त्वदभेद-
स्तोत्रपराऽमृतवृष्टिरुदेति ॥७॥

शङ्कर! सत्यमिदं व्रतदान-
स्नानतपो भवतापविनाशि ।
तावकशास्त्रपराऽमृतचिन्ता
स्यन्दति चेतसि निर्वृतिधाराः ॥८॥

नृत्यति गायति हृष्यति गाढं
संविदियं मम भैरवनाथ!
त्वां प्रियमाप्य सुदर्शनमेकं
दुर्लभमन्यजनैः समयज्ञम् ॥९॥

वसुरसपौषे कृष्णदशम्या-

मभिनवगुप्तः स्तवमिममकरोत् ।

येन विभुर्भवमरुसन्तापं

शमयति झटिति जनस्य दयालुः ।।१०।।

हरिरेव जगज्जगदेव हरिः

हरितो जगतो नहि भिन्नमणुः ।

इति यस्यमतिः परमार्थगतिः

स नरो भवसागरमुत्तरति ।।११।।

आदावन्ते चिद्रस रूपं

मध्येचिद्रस बुद्बुद्रूपम् ।

भातं भातं भारूपं स्यात्

नो भातं चेन्नितरां न स्यात् ।।१२।।

***

अस्त्यस्मिन्महसा महानिधिरसौ देवो विवस्वान् महान्

यस्मिञ्जाग्रति जाग्रतीव रजनीसुप्ता इमे जन्मिनः।

किन्त्वेका महती ततो विजयते श्रीदेशिकाङ्घ्रिद्युति-

र्यद्भासाच्छुरितं चिरन्तनतमो हित्वेव जागर्ति सत् ।।

अथ भोजनविधिः ॥

अन्न को देख कर और हाथ जोडकर यह कहे

अस्माकं नित्यमस्त्वेतदिति स्मृत्वा च वन्दयेत् ॥

अन्न को पानी से छिडकना

ॐ उच्छिष्टोच्छिष्टोपहतं यच्च पापेन हतं मृतसूतकाद्वा।
दसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतं यच्चान्यत् ॥

दाहिने तरफ अन्नके तीन भाग छोडना ।

ॐभूपतये नमः।ॐभुवनपतयेनमः।ॐभूतानांपतयेनमः।

अपोशान लेना ।

अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योतीरसोऽमृतम् ॥
ब्रह्मभूर्भुवः स्वरोम् ॥
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥
ओममृतोपस्तरणमसि स्वाहेत्याचम्य ॥
ओं जूं सः-अमृतेश्वर-भैरवाय-इति मन्त्रेण॥

अन्न समाप्त करने पर इस मन्त्र से आचमन लेना।

'अमृतापिधानमसि स्वाहा ॥'

तदुपरान्त दायें हाथ के अंगूठेसे दायें पैर के अंगूठे पर पानी छोडना ।

अङ्गुष्ठमात्रः पुरुषः सोऽङ्गुष्ठाग्रमुपाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥

ॐ जुं सः अमृतेश्वरभैरवाय नमः ।।१०।।

अन्नपात्र उठाने के उपरान्त फूल हाथ में लेकर खडे होकर इस मन्त्र का ऊंची आवाज में श्रद्धापूर्वक उच्चारण करें ।।

ॐ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ।।
नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि
सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मां
अवतु वक्तारं ॐशान्तिः शान्तिः शान्तिः।।
ॐ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ।।
नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि ।
त्वामेव प्रत्यक्षं ब्रह्म अवादिष्यं ऋतं अवादिष्यं
सत्यं अवादिष्यं तन्मामवतु तद्वक्तारमवतु अवतु मां
अवतु वक्तारं ॐशान्तिः शान्तिः शान्तिः।।
सर्वेभवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वेभद्राणि पश्यन्तु मा कश्चित् दुःखभाक् जनः।।
नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ।।
राजस्वस्ति प्रजास्वस्ति देशस्वस्ति तथैव च ।
यजमानगृहे स्वस्ति स्वस्ति गो ब्राह्मणेषुच ।।

अग्नि को तीन बार परिक्रमा करते करते पढ़े ।

ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।।

यह पढ़ते पढ़ते पुष्पाञ्जलिः अग्नि में अर्पण करके
साष्टाङ्ग प्रणाम करें ।।

जय गुरुदेव ।

इति शिवम् ।।

A35